वर्षम् – ७०
संयुक्ताङ्कः ५,६,७
फाल्गुन–चैत्र–वैशाखमासाः
विक्रमाब्दः २०७६–७७
युगाब्दः ५१२१–२२
मार्च, अप्रेल, मई २०२०

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
(१५ वर्षाणि)
१५००/–

प्रकाशन प्रत्येक माह की 1 तारीख



आश्रयन्तु महामारीपीडिता विश्वमानवाः।
औषधानां कृते पथ्यान् भारतीयान् वनस्पतीन्॥

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | कोरोनाशतकम् | पद्मश्रीः प्रो- अभिराजराजेन्द्रमिश्रः | ७ |
| ३ | कोरोना वायरस से सावधानियां | कैलाश चतुर्वेदी | १२ |
| ४ | विनायकसहस्रसिद्धे | पं. राजेन्द्रमोहनशर्मा | १३ |
| ५ | युव-प्रेरकः श्रीविवेकानन्दः | डॉ. अनीता अग्रवालः | १६ |
| ६ | २०७७-नूतनवर्षाभिनन्दनम् | गगेन्द्रसिंह आर्यः | १८ |
| ७ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः | १९ |
| ८ | लिङ्गमशिष्यम्, लोकाश्रयत्वात् | जन्मेश मीणा | २० |
| ९ | प्रियं भारतम् | पं. रमेशचन्द्रशर्मा व्याख्याता | २२ |
| १० | वेदविमर्शः | सत्यप्रकाशः गुप्ता | २५ |
| ११ | पद्मश्रीः मिश्रोऽभिराजराजेन्द्रः | प्रोफेसर श्रीकृष्णशर्मा | २९ |
| १२ | अस्माकं गुरवः | वेणीमाधव गो. धर्माधिकारी | ३० |
| १३ | प्रेरकप्रसङ्गशतकम् | सौ. आराधना धर्माधिकारी | ३१ |
| १४ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | ३२ |
| १५ | संस्कृतश्लोकमन्दाकिनी | डॉ. प्रमोदकुमारशर्मा | ३३ |
| १६ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३४ |
| १७ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३७ |
| १८ | ज्योतिष-वास्तु-प्रशिक्षणशिविरा...... | डॉ. सुरेन्द्रकुमारशर्मा | ३९ |
| १९ | संस्कृतसमाचारः | ..... | ४० |
| २० | सेवासमाचाराः | डॉ. नाथूलालसुमनः | ४१ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठं सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठं रेवासा )
स्वामी संवित् सोमगिरिः
( बीकानेरम् )
महन्तः प्रतापपुरी
( तारातरामठं बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामाशर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकौ
डॉ. स्नेहलताशर्मा
डॉ. पवनव्यासः

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः
प्रोफेसर शंकरप्रसादशुक्लः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूका

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

वर्षम् 70 संयुक्ताङ्कः -5,6,7
फाल्गुनचैत्रवैशाखमासाः
विक्रमाब्दः 2076, 2077
मार्च, अप्रेल, मई, 2020

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 120/-
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- ( 15 वर्षाणि )

सम्पादकीयम्

# निखिलं भुवनं व्याप्तं 'कोरोना' व्याधिनाऽधुना

...✍ प्रोफेसर श्रीकृष्णशर्मा

प्रायेण सम्पूर्णं जगदधुना 'मुकुटाकारविषाणु' (corona virus or covid-19) इत्याख्येन व्याधिना व्याप्तम्। चीनदेशोद्भवेयं रुग् इटली-ईरान-अमेरिकादिसर्वेषु योरपदेशेषु प्रसृता सती भारतवर्षेऽपि प्रविष्टा। विश्वस्मिन् जगति प्रायेण सार्द्धचतुर्लक्ष-परिमितजनेभ्योऽप्यधिकाः जना इदानीं यावद् मृत्युं गताः। प्रतिदिनं सहसा भूयसी संख्या व्याधिग्रस्तानां दिवंगतानाञ्च वर्धत एव। 'विश्वस्वास्थ्यसंघटनम्' (W.H.O.) इत्याख्यसंस्थया corona virus इति व्याधिः 'महामारी' (Epidemic-disease) इति नाम्ना प्रागेव समुद्घुष्टः। भारतवर्षे प्रधानमन्त्रिणां श्रीनरेन्द्रमोदीमहाभागानां सूक्ष्मेक्षिकावशाद् जनाः चिकित्सकानां सर्वेक्षणे देशान्तरापेक्षया संरक्षिताः सन्ति।

चीनदेशे 'अजिनपत्रा' (Bat) इत्याख्यस्य पक्षिणो मांसभक्षणस्य प्रतिकारेणोद्भूतोऽयं व्याधिर्महामारं रूपं प्राप्तः सन् सर्वत्र प्रसृतः। अस्य व्याधेरौषध-मधुना किमपि नाविष्कृतम्। शुचित्वमेवास्य निरोधाय साधनं भवितुमर्हति। यथा-दूरतो नमस्कारः अञ्ज-लिशिरः संयोगात्मको विधेयः, न तु परस्परं हस्तमेलनम्। हस्तौ पादौ च प्रक्षाल्य गृहे प्रवेष्टव्यम्। सम्मिल्य एकस्मिन्नेव पात्रे न भोक्तव्यम्। स्वकीयरसवत्या पक्वः शाकाहार एव ग्राह्यः। पर्यावरणस्य शुद्धिर्विधेया। सम्मर्दे न गन्तव्यम् इत्यादीनि। भारतीयसंस्कृतौ यन्निरूपितमस्ति अतिथये अर्घ्यप्रदानादिकम्, तुलसीपत्रसेवनम्, सात्त्विकं जीवनम्, सात्त्विक आहारः, मा हिंस्याः सर्वा भूतानि, अहिंसा परमो धर्म इत्यादिकं तदेव विश्वस्मिन् जगति अधुना सदाचरणाय अपेक्ष्यते। अधुना स्वच्छ-जल-वायुसेवनेन सात्त्विकाहार-विहारेण पर्यावरण-शुद्धिद्वारैव चास्माकं जीवनं संरक्षितं भवितुमर्हतीति तदेवाचरणीयम्। भारतीयसंस्कृतेः सम्पोषकानामस्माकं प्रधानमन्त्रिणां corona virus इति रुजाया अपाकरणाय कटिबद्धतामन्वीक्ष्य 'विश्व-स्वास्थ्य-संघटनम् (W.H.O.) इति संस्थाध्यक्षेण महती प्रशंसा प्रसारितेत्यस्माकं गौरवम्।

इतः पूर्वमपि 'सॉर्स-वायरस' 'स्वाइन-फ्लू' प्रभृतयो भयङ्करा व्याधयोऽपि चीनदेशतः प्रसृता अभूवन् किन्तु विश्वस्मिन् जगति समकालमेवैतादृशी विस्फोटकस्थितिर्नासीत्। 'कोरोना वायरस' तु निखिलेऽपि भूमण्डलेऽनियन्त्रितो भूत्वाऽप्रतिहित एव प्रसरति। विषाणुरयं मानवकेशस्य नवशतांशादपि (1/900 अंशः) सूक्ष्मो मन्यते। परस्परं मनुष्येषु सङ्क्रमति। तापः, प्रतिश्यायः, नासिकास्रवणम्, श्वसने पीडा, कण्ठपाकादीनि कोरानाव्याधेः सामान्यलक्षणं निगद्यते। मधुमेह-श्वासरोग-हृदयरोग-पीडितानां कृते व्याधिरयं विशेषभीतिकरः।

व्याधेरस्य नास्तीदानीं यावत् काचन निश्चितचिकित्सा, न वा गव्यस्य (Vaccination) आविष्कार: सञ्जात: तथापि शरीरे रोगप्रतिरोधक-क्षमताया: (Immunity) विकास:, पौन: पुन्येन हस्तप्रक्षालनम्, सम्मर्दतो दूरीभवनम्, जनान्तरेभ्यो गजपरिमितं दूरीभवनम्, मुखाच्छादनमित्यादिरूपेण प्रागवधानं विधेयम्।

कोरानाव्याधेश्चीनदेशानन्तरं यद्यपि सर्वेषु देशेषु सङ्क्रमणं जातम्, तथापि अमेरिका-ब्राजील-रूस-स्पेन-इग्लैण्ड-इटली-फ्रांस-जर्मनी-पेरू-ईरानप्रभृति देशानामिदानीमपि दुरवस्था वर्तते। अत: सर्वत्र मार्चमास एव जनताया: कृते 'ताल-बन्धनम्' (LOCK DOWN) सञ्जातम्। तच्च सम्पूर्णराष्ट्रे 25.03.2020 त: मई मासं यावदनवरतं (69 दिनानि) प्राचलत्। अस्माकं भारतवर्षे प्रधानमन्त्रिणा यथाकालमेव 'जनताकर्फ्यू' 22.03.2020 दिनाङ्के समुद्घोषितम्, 25.03.2020 दिनाङ्कत: 14.04.2020 दिनाङ्कं यावत्, पुन: 15.04.20 त: 03.05.20 दिनाङ्कं यावत्, तत: 04.05.2020 त: 17.05.2020 दिनाङ्कं यावत्, अन्ते च 18.05.2020 त: 31.05.2020 दिनाङ्कं यावत् सम्पूर्णं 'LOCK DOWN' इति समुद्घोषितम्, तेन 'कोरोना व्याधे:' सङ्क्रमणस्य शृंखला विच्छिन्ना जाता। किन्तु 'LOCK DOWN' इत्यस्य 01.06.2020 त: अपाकरणा-नन्तरमस्माकं देशेऽपि विकटा स्थितिर्भयावहा। महाराष्ट्र-दिल्ली-गुजरात-पश्चिमबंगाल-मध्यप्रदेशानां स्थिति-रनियन्त्रितेव प्रतीयते। राजस्थानप्रान्तस्य दूरदर्शिना मुख्यमन्त्रिणा तु व्याधेराक्रामकतां वीक्ष्य 23 मार्च 2020 त: एव 'LOCK DOWN' इत्युद्घोषितमत: किञ्चिन्नियन्त्रणं जातम्, इदानीं (15.06.2020) यावत् भारते वर्षे 9911 संख्यका: जना दिवंगता:, राजस्थान-प्रान्ते च 301 संख्यका: दिवंप्रयाता:। व्याधिरयं सर्वत्र भूमण्डलेऽधुनाऽपि अनियन्त्रित:, न जाने श्व: किं भवितेति शङ्किता: सर्वे जना:। 'LOCK DOWN' काले सर्वत्र व्यापार:, उद्योगा: पठनं-पाठनम्, कार्यालयीयव्यवस्था, वायुयान-रेल-बसयात्रा: स्थगिता:। एकदेशादन्येषु देशेषु गमनागमनम्, किञ्च एकस्मिन्नेव देशेऽपि राज्यान्तरप्राप्तिरित्यादिकं सर्वमस्त-व्यस्तं जातमासीत्। आर्थिकस्थिति-श्छिन्नभिन्ना जाता। तथापि भारते वर्षे सर्वकार: यावच्छक्यं जनानां साहाय्यं विदधातीति अस्माकं सौभाग्यम्।

अस्माकं भारतीयसंस्कृतौ किं वा चिकित्सा-शास्त्रे विविधसङ्क्रमणेभ्य: संरक्षितुं ये शास्त्रीय-नियमास्सन्दर्शितास्तेऽधुना वैज्ञानिकदृष्ट्या सर्वथा प्रासङ्गिका: सञ्जातास्तथाहि-

1. 'उपानहौ च वासश्च धृतमन्यैर्न धारयेत्'। (मनुस्मृति:, 4/66) अर्थादपरेण जनेन धारितौ पादत्राणौ वस्त्राणि च नोपयोगे करणीयानि।

2. 'नासंवृत्तमुख: सदसि जृम्भोद्गारकासश्वास-क्षवथूनुत्सृजेत्'। (सुश्रुतसंहिता, चिकित्सा, 24/94) अर्थाद् मुखपिधानं विना सभायां विजृम्भणम् (Yawning), उद्गार: (Eructation), कास-श्वास: (Cough), क्षवथुश्च (छिक्का, Sneeza) न प्रयोक्तव्य:।

3. 'नाकारणाद् वा निष्ठीवेत्'। (कूर्मपुराणम्, उ. 16/68)। अर्थात् कारणं विना यत्र-तत्र निष्ठीवनं (Spitting) न कुर्यात्।

4. 'नाऽप्रक्षालितमुखपाणिपादो भुञ्जीत'। (सुश्रुतसंहिता, चिकित्सा, 24/98) अर्थात् हस्तपादौ मुखं च प्रक्षाल्यैव भोजनं कुर्यात्।

5. 'न धारयेत् परस्यैवं स्नानवस्त्रं कदाचन'। (पद्मपुराणम्, सृष्टि., 51/86) अर्थात् परेण केनापि उपयोगविषयीकृतं स्नानवस्त्रं गात्रप्रोञ्छकं (Towel) प्रभृति न प्रयोक्तव्यम्।

6. 'अपमृज्यान्न च स्नातो गात्राण्यम्बरपाणिभिः'। (मार्कण्डेयपुराणम्, 34/52) अर्थात् स्नानक्रियानन्तरं शरीराङ्गानि स्नाने प्रयुक्तवस्त्रेण पाणिभ्याञ्च न प्रोञ्छनीयानि।

7. 'अकृत्वा पादयोः शौचं मार्गतो न शुचिर्भवेत्'। (पद्मपुराणम्, स्वर्ग., 52/10) अर्थाद् बाह्यस्थानाद् आगतो जनो हस्तपादप्रक्षालनं विना पवित्रो न भवति।

8. 'अन्यदेव भवेद् वासः शयनीये नरोत्तम! अन्यद् रथ्यासु देवानाम् अर्चायामन्यदेव हि।।' (महाभारतम्, अनुशासनपर्व, 104/86) अर्थाद् गृहाद् वहिः भ्रमणकाले, देवपूजासमये, शयनकाले च भिन्न-भिन्नानि वस्त्राणि धारणीयानि।

9. 'न छिन्द्यान्नखलोमानि दन्तैर्नोत्पाटयेन्नखान्'- (मनुस्मृतिः 4/69) अर्थाद् नखान् दन्तैर्नोत्पाटयेद्, लोम्नाञ्च उच्छेदनं न कुर्यात्।

10. 'लवणं व्यञ्जनं चैव घृतं तैलं तथैव च। लेह्यं पेयं च विविधं हस्तदत्तं न भक्षयेद्।।' (धर्मसिन्धुः, उ.पू. आह्निके) उपर्युक्तवस्तूनां परिवेषणं भोजनकाले साक्षाद् हस्तेन वर्जनीयमस्ति।

11. 'अनातुरः स्वानि खानि न स्पृशेदनिमित्ततः।' (मनुस्मृतिः, 4/44) निष्कारणं चक्षुः-श्रोत्र-घ्राणेन्द्रियादीनां स्पर्शो न करणीय इत्यर्थः। दिङ्मात्रमेतद्।

तदित्थं विश्व-स्वास्थ्य-संघटनद्वारा (W.H.O.) व्याधिप्रसारावरोधाय येऽप्युपायाः निर्दिष्टा-स्तेऽत्र प्रायेण शुचित्वविधाने समाविष्टाः। अस्मिन्नङ्के 'कोरोना' व्याधेः करालस्वरूपमनुभूय पद्मश्रीपुरस्कृतै-र्मिश्रवर्यैरभिराजराजेन्द्रमहाशयैः त्वरितमेव 'कोरोना-शतकम्' इत्यनेन हृदयस्पर्शि कवित्वं प्रस्तुतम्। अपि च 'परधर्मो भयावहः' इति शीर्षकद्वारा डॉ. राजेश्वरीभट्ट-महोदयया, 'कोरोना वायरस से सावधानियाँ' इति शीर्षकाङ्कितेन सप्तभिः संस्कृतपद्यैः श्री कैलाशचतुर्वेदैश्च 'कोरोना' व्याधिमालक्ष्यैव भारतीयसंस्कृतेः विचार-कणिकाः सम्प्रस्तुताः सन्ति। कोरोनासङ्क्रमणकाले 'डाक' द्वारा प्रेषणव्यवस्था नास्ति अतएवं अङ्कप्रकाशने विलम्बः जातः संयुक्ताङ्कश्च प्रकाश्यते। अस्मिन् संयुक्ताङ्के येषां विद्वद्वर्याणां लेखाः सम्प्राप्ताः प्रकाशिताश्च तान् प्रति कार्तज्ञ्यमावहामः।

**व्याकरणपीठाध्यक्षचरः**
**जगद्गुरुरामानन्दाचार्य-**
**राजस्थानसंस्कृतविश्वविद्यालयः, जयपुरम्**

# कोरोनाशतकम्

❑ पद्मश्रीः प्रोफेसर
अभिराजराजेन्द्रमिश्रः

यथाऽऽसीन्महदातङ्को गौराङ्गशासनावधौ।
विषूचिकामहामार्याः प्लेगनाम्या रुजोऽथवा।।1।।

ततोऽपि दारुणं जातं भैरवञ्च महद्भयम्।
करोनाया महामार्या दुराधर्षं निरौषधम्।।2।।

विषाणुरस्य रोगस्य क्षणेनैव प्रवर्धते।
शतं सहस्रं लक्षं वा हित्वा कोटिगुणायते।।3।।

अयं विषाणुर्नासातो मुखाद्वा नेत्रवर्त्मना।
प्रविश्य फुफ्फुसं कम्रं सङ्क्राम्यति निरौषधः।।4।।

नयनं जायते रक्तं किंशुकपुष्पलोहितम्।
ज्वरश्चापि कृतैर्यत्नैरसह्यः प्राणघातकः।।5।।

आगमो निर्गमश्चापि निःश्वासस्य प्रबाध्यते।
फुफ्फुसोऽप्यन्ततो विद्धस्सविस्फोटं विनश्यति।।6।।

नामाऽप्यस्या महामार्या न केनापि श्रुतं पुरा।
धूमकेतुरयं दृष्टस्सहसैव विलक्षणः।।7।।

प्रशमनोपायाः केऽपि सम्बभूवुर्न सार्थकाः।
न च केनापि राष्ट्रेण समाधानं गवेषितम्।।8।।

हाहाकारस्ततो विश्वप्राङ्गणेऽद्य समुत्थितः
वैज्ञानिका दधद्गर्वाः कान्दिशीका विलोकिताः।।9।।

त्रिसहस्राधिका नूनं चीनदेशे दिवङ्गताः।
दक्षिणकोरियादेशेऽप्यहो जातं महद्भयम्।।10।।

इटल्यामम्बरीषेऽपि पाकिस्तानेऽथ भारते।
मलेशियाऽफगाने वाऽपीराने सर्वतोऽधिकम्।।11।।

प्रायेण निखिले विश्वे सप्तसहस्रसंख्यकाः।
कालस्य कवलीभूताः सागसो वा निरागसः।।12।।

भारतेऽपि त्रयो हन्त सैरिभवाहनाहृताः।
अकाल एव संसारं प्रविमुच्य दिवङ्गताः।।13।।

आस्तां तावदिदं सर्वं, राष्ट्रमद्य समुद्यतम्।
आत्मानं रक्षितुं यत्नैःरक्षिष्यत्यपि निश्चितम्।।14।।

अन्ये शतमिताश्चापि रुग्णा अष्टादशाधिकाः।
यत्नतश्चोपचर्यन्ते भिषग्भी रोगवेदिभिः।।15।।

भारतेऽपि समायातो रोगोऽयं बाह्यदेशतः।
मिथस्सम्पर्कजस्सोऽयं सहसा बहुलोऽभवत्।।16।।

भारताभिजना ये वै ईरानादिभुवं गताः।
त एव सार्धमानीत-वन्तश्चेमं विषाणुकम्।।17।।

नैतावदेव, किञ्चन ददृशे सङ्कटान्तरम्।
यद्राष्ट्रस्य कृते जातं समाधेयं प्रयत्नतः।।18।।

इटल्यां चीनदेशेऽपीराने बहुसंख्यकाः।
प्रवसन्तो भारतीयाः करोनाभयभङ्गुराः।।19।।

स्वदेशं हि समागन्तुं सञ्जाता द्रुतकातराः।
तेषां कुटुम्बिनश्चापि समुद्विग्ना भयातुराः।।20।।

अनुरोधं कृतवन्तश्शासनं प्रति नित्यशः।
करोनारोगतो मुक्तिं दापयितुं मुहुर्मुहुः।।21।।

मोदिवर्यो नरेन्द्रोऽसौ प्रार्थनया वशीकृतः।
प्रधानमन्त्रिरूपेण स्वेतिकर्तव्यतां दधे।।22।।

प्रेषयित्वा विमानं स्वं तूर्णं देशान्तरे ततः।
प्रोषितान् भारतीयान् स आनयामास भारतम्।।23।।

तेन राष्ट्रं परं तुष्टं परितुष्टाः कुटुम्बिनः।
परितुष्टं जगत्सर्वं भारतप्रीतिनिष्ठया।।24।।

चिचिन्त सकलं विश्वं भारतमेव भारतम्।
स्वजनानामहो यद्धि योगक्षमौ प्रतन्वते।। 25।।
पाकिस्तानकृते स्वीयाः सैनिका बर्करोपमाः।
म्रियन्ते चेन्म्रियन्तां ते, मूल्यं दत्तमपेक्षितम्।। 26।।
शवास्तेषां निखाताः स्युस्सादरं धरणीतले।
भक्षिता वा शृगालैः स्युः का नु चिन्ताऽत्र जीवताम्।।27।।
कार्गिलसमरे सोऽयं व्यवहारः प्रदर्शितः।
स्वसैनिकान् मृतान् हित्वा पाकश्वानः पलायिताः।।28।।
सादरं भारतीयास्तान् भूमिगर्ते शवान्दधुः।
कुरानोच्चारणं कृत्वा यथाधर्मं यथाविधि।। 29।।
स्वजनानानयामास भारतं निष्ठया तया।
यथा ते स्वकुटुम्बे स्युः सार्धमेव कुटुम्बिभिः।।30।।
आनीतेष्वपि तेष्वेको द्वौ त्रयोऽथ च पञ्चषाः।
नूनं करोनासंग्रस्ता अलक्ष्यन्त परीक्षिताः।। 31।।
एवं हि भारतेऽप्यद्धा करोनाविषमूर्च्छिताः।
सन्दृष्टाः, अन्यथा राष्ट्रमासीदेव समञ्जसम्।। 32।।
प्रधानमन्त्रिसङ्कल्पैः राष्ट्रं जातं समुद्यतम्।
निष्करोनं विधातुं स्वं भारतं सर्वतोमुखम्।। 33।।
दुर्निवारो यतश्चायं विषाणुः स्पर्शजो मतः।
ततो नु वारयामास मोदी स्पर्शान्नु बान्धवान्।।34।।
स्वकीये खलु सन्देशे महामात्योऽवदद्यथा।
सोऽयम्मोदी नरेन्द्रोऽहं किञ्चिदद्य निवेदये।। 35।।
बान्धवा भारतीया मे श्रूयतां वचनं मम।
हित्वा सर्वविधं स्पर्शं पालयन्तां स्वसंस्कृतिम्।।36।।
स्वदेशीयो भवेन्मित्रं मित्रं वैदेशिकोऽथवा।
अलं तस्य परिष्वङ्गैश्चुम्बनैर्हस्तमेलनैः।। 37।।

दूरादेव नमस्कारो हस्तसम्पुटमुद्रया।
समुदाचारमाहर्तुं करणीयस्सहादरम्।। 38।।
'नमस्ते' चापि वक्तव्यः प्रणिधाय वपुर्मनाक्।
सेयं परम्पराऽस्माकं भारतीया पुरातनी।। 39।।
यात्रा नैव विधातव्या जनसम्मर्दसङ्कुला।
रेलयाने बाष्पयाने विमाने चापि यत्नतः।। 40।।
वर्जनीयाः समारोहाः करोनारतिभूमयः।
क्वचित्कस्यापि संस्पर्शैर्विषाणुर्न विशेत्तनौ।। 41।।
जनः कः कुत आयातो निर्विषाणुर्भवेन्न वा।
ज्ञातुमित्यसमर्थानामेकान्तसेवनं वरम्।। 42।।
यावन्नापसरेद्राष्ट्राद् रुगातङ्कोऽतिदारुणः।
तावत् पुत्रकलत्राणां मध्य एव वरं स्थितिः।। 43।।
अलं भयेन दैन्येन वैवश्येनाथ चिन्तया।
असहायभावनयाऽप्यलं हीनमनोरथैः।। 44।।
नरेन्द्रमोदीनामाऽयं यावज्जीवति बान्धवः।
न भयं भारतीयानां कोरोनातः किमप्यहो।। 45।।
यावदेव महामात्य आजुहाव स्वराष्ट्रजान्।
तावदेव रुजं रोद्धुं भारतेन यता कटिः।। 46।।
यात्रिभिः स्थगिता यात्रास्तिथयः परिवर्तिताः।
परमार्थतो निरस्ता नियता वा महोत्सवाः।। 47।।
गृहीता उचितोपायाः प्रतियानचतुष्पथम्।
करोनाप्रतिरोधार्थं शासनादेशवर्तिभिः।। 48।।
विषाणुनाशकैर्नीरैर्बहिस्त आगतानि वै।
प्रक्षालितानि यानानि प्रत्यहं नु यथायथम्।। 49।।
अयष्पथगन्त्रीणाञ्च सर्वे जवनिकापटाः।
जात्वधौता गवाक्षेभ्योऽप्यवतार्य पृथक्कृताः।।50।।

सकृच्चापि न धौतानि कम्बलान्याक्रयावधेः।।
प्रयोक्तुं च निषिद्धानि त्वरितं रेलमन्त्रिणा।। 51।।
विष्टरं प्रच्छदं चापि कम्बलं यात्रिणेऽधुना।
विभागो दास्यति नैव तदानेयं स्वयं जनैः।। 52।।
इत्यपि घोषितं स्वैरं रेलयानाधिकारिभिः।
तत्सर्वमेव सानन्दं यात्रिभिश्चाभिनन्दितम्।। 53।।
ऐतिह्यपक्षः सम्प्रति विषाणोरस्य गूहितः।
प्रकाशनीयोऽवश्यं हि ज्ञेयश्च राष्ट्रवासिभिः।। 54।।
कस्मात्कुतः कथं सोऽयं दाववह्निस्समुत्थितः।
दह्यते येन कान्तारः सत्त्वोद्भिज्जादिसङ्कुलः।।55।।
श्रूयते यद्धि चीनस्थे वुहानानाम्नि संस्थले।
विषाणुश्चीनदेशेन संहारार्हः प्रकल्पितः।। 56।।
विश्वविध्वंसकामोऽयं नीचश्चीनोऽतिदर्पितः।
नृशंसकर्मा दृप्तश्च निर्मर्यादोऽतिनिष्ठुरः।। 57।।
भारतं मन्यमानः स्वं सविशेषं सपत्नकम्।
प्रतिवेशानन्यांश्चापि भारतपक्षपातिनः।। 58।।
गुप्तरीत्या, विना युद्धं विषाणोरेव माध्यमैः।
अरातिजातमुच्छेत्तुं वाञ्छति चौरकर्मणा।। 59।।
वैज्ञानिकैर्नु तत्रत्यैः शासनादेशवर्तिभिः।
अयं प्राणहरः सृष्टो विषाणुर्विश्वनाशकः।। 60।।
आसीन्निगूहितं सर्वं, संस्खलितेन केनचित्।
किन्तु भाण्डमिदं दिष्ट्या संस्फुटितं विना श्रमम्।।61।।
ततो भस्मासुरकल्प करोनासुरनामकः।
विषाणुश्चीनमेवाग्रे ध्वंसितुमुपचक्रमे।। 62।।
शर्वरीविहगा दैवात् चमगादडसंज्ञकाः।
तस्यां प्रयोगशालायामाक्रमणं दृढं दधुः।। 63।।
अस्मिन्नाक्रमणे नूनं करोनाख्यविषाणवः।
संसक्ताः पक्षिदेहेषु रुधिरेषु च मिश्रिताः।। 64।।

त एव पक्षिणः पश्चात् हत्वा भोजे समर्पिताः।
भोज्यमांसतया यद्वा सूपरूपतया क्वचित्।। 65।।
मांसादिनां शरीरेषु सुखेनैव प्रवेशिताः।
दर्शितवन्तः स्वीयन्ते विक्रयं रभसेन वै।। 66।।
चीनस्था अन्यदेशीया निशाविहगभक्षकाः।
जाता एषां विषाणूनां स्वीयदेशे प्रवर्तकाः।। 67।।
यत्र यत्र गताश्चीनाः करोनाश्चापि संगताः।
एवं हि निखिले विश्वे महामारी कृतास्पदा।। 68।।
चीनाश्चान्येऽथ चीनस्था यत्र तत्र विषाणवः।
एवं चीनार्जितं पापं भुनक्ति सकलं जगत्।। 69।।
अपक्वः खलु यो मांसः पिशितं हि तदुच्यते।
अश्नन्ति पिशितं ये वै पिशाचाश्चैव ते मताः।। 70।।
चीना दृष्ट्या तया नूनं पिशाचा एव मानिताः।
यतः कृशानुकल्पास्ते दृश्यन्ते सर्वभक्षिणः।। 71।।
मत्कुणाः कृमयः कीटाः पल्ल्यो गोधा भुजङ्गमाः।
पक्षिणः सर्वजातीया ग्राम्या वन्याः पशुव्रजाः।।72।।
भक्ष्याः सर्वेऽपि चीनानां पक्वा जीवन्त एव वा।
अहो नृशंसता तेषामतिशेतेऽसुरानपि।। 73।।
चतुर्दशोत्तरशतविधमांसस्य भक्षिणः[1]।
भवन्ति चीनदेशीयाः प्रमाणैरिति वेद्यते।। 74।।
जीवन्त्योऽपि वृहल्लूता ज्वलत्तैलेन भूर्जिताः।
विक्रीयन्ते राजमार्गे प्रत्यक्षं तत्र नित्यशः।। 75।।
व्याघ्रशिश्नमदन्त्येते कामशक्तिविवृद्धये।
सर्परक्तं पिबन्त्यद्धा कुक्कुरं भक्षयन्ति च।। 76।।
किन्न खादन्ति दैत्यास्ते बौद्धधर्मानुयायिनः।
कीदृशास्ते खला बौद्धा कीदृशाश्चापि धार्मिकाः।।77।।

1. चीनदेशे 114 प्रकारका मांसा भक्ष्यन्ते।

तेषामेव हि जीवानां प्राणपीडाऽभिशापतः।
चीनो विनाशलीलाया भविता जगति स्थलम्।।78।।

क्रन्दनं मृत्युकष्टञ्च शातनं प्राणयन्त्रणम्।
तेषां निर्दोषजीवानां नूनं चीनं विनङ्क्ष्यति।। 79।।

अहिंसा परमो धर्म इति माति हि भारतम्।
जीवदयापक्षंधरं चकास्ति धरणीतले।। 80।।

कामं भवेयुरत्रापि केचिन्मांसादिनो जनाः।
सन्ति ध्रुवं समाजेन त्यक्तनिन्दितथूत्कृताः।। 81।।

नृशंसराक्षसेभ्योऽपि प्रचुरं तेऽधमा जनाः।
जीवन्तं प्राणिनं हत्वा बुभुक्षां शमयन्ति ये।। 82।।

उदारा वसुधाऽस्माकं मातृकल्पाऽतिवत्सला।
उत्पादयत्यहो भक्ष्यं किं किं नैवाऽमृतोपमम्।।83।।

वास्तुकं धान्यकं मूलं पलाण्डुमालुकं तथा।
पालक्यं शर्कराकन्दं शाकं कं कं न पौष्टिकम्।।84।।

पुष्प-ग्रन्थि-पत्रभिन्ना गोजिह्वा स्वादु गृञ्जनम्।
ताम्रतरञ्च[2] वृन्ताकं भूमिगर्भान्नु जायते।। 85।।

लध्वाकारं बृहद्रूपं दीर्घ तनु च वर्तुलम्।
भिन्नोपयोगं वृन्ताकं जनन्योत्पादितं भुवा।। 86।।

कूष्माण्डालाबुमरिच-तरुरोही[3] शरपुत्रिकाः[4]।
लिकुचं पनसं जम्बु कारवेल्लनुत्तमम्।। 87।।

हन्त शतविधाः शाकाः शतकन्दफलानि च।
रोगव्याधिहराण्यम्बा पृथ्वी सृष्टवती स्वयम्।। 88।।

परं स्वास्थ्यकरं सर्वमपक्वमपि भक्षितम्।
पक्वञ्चापि तृप्तिकरं रक्तपातादिवर्जितम्।। 89।।

पशुमांसस्थिता रोगा प्रविश्य घ्नन्ति मानवम्।
गुणाः शाकस्थिताः किन्तु पुष्णन्त्येव निजाश्रयम्।।90।।

गूढं रहस्यमेतद्धि नो विजानाति मानवः।
जिह्वालौल्यवशीभूतः शवमांसं भुनक्त्यहो।। 91।।

2. टमाटर 3.तर्रोई 4. सरपुतिया।

जीवनमेव शाकानां फलानां सार्थतां व्रजेत्।
अन्नादीनां यदि स्युस्ते भक्षिताः पशुभिर्नरैः।। 92।।

अन्यथा ते स्वयं शुष्का भविष्यन्ति मृताः खलु।
निर्गुणा निरुपादेया मोघजन्मान उज्झिताः।। 93।।

इयं हि वैधसी सृष्टिः कल्पिता परमेष्ठिना।
परस्परोपकर्त्र्येव नैरपेक्ष्यं न चात्र भोः।। 94।।

शाकाहारास्ततः सभ्या भवतात्मप्रतुष्टये।
पिशाचजीवनं त्यक्त्वा गृह्णीत किल दैवतम्।।95।।

पुत्रपौत्रप्रियास्तातं स्वजनान् भक्षयाऽन्यथा।
श्रूयते यन्नृमांसो हि पशुमांसाद् विशिष्यते।। 96।।

विमुच्य राक्षसाहारं रक्तमांसादिसङ्कुलम्।
पौष्टिकं सात्त्विकं भद्र ! गृह्णीतैव निरामिषम्।। 97

अन्यथा यं हि क्रन्दन्तं वेपमानमशक्तिकम्।
प्रसह्य भक्षयस्यद्य श्वोऽसौ त्वामपि पक्ष्यति।। 98।।

अलं हीनबलं हत्वा जिह्वास्वादाय पक्षिणम्।
पशुं वा त्वद्दयाऽधीनं किन्नु पापमतः परम्।। 99।।

समस्तेनैव विश्वेन जिनधर्मावलम्बिना।
भाव्यमेव, कृमिञ्चापि घातयन्ति न ये क्वचित्।।100।।

अहिंसैव परं मुख्यं दशाङ्गधर्मलक्षणे।
अहिंसको मतो लोके, नरः सन्नपि देवता।। 101।।

हिंसकस्य वृथा सत्यं, वृथा शौचं, वृथा तपः।
वृथा दानोपकारौ च सर्वमेव कृतं वृथा।। 102।।

अनृशस्यं परो धर्मः सर्वभूतहितावहम्।
नृशंसता परं पापं राक्षसं कर्म निन्दितम्।। 103।।

यो हि प्राणहरः पापी नारकं तस्य जीवनम्।
जीवनं प्राणदातॄणामिहैव स्वर्गसन्निभम्।। 104।।

जानताऽपि मया नाथ जीवो नाद्य हतः क्वचित्।
इति सम्प्रार्थ्य शर्वर्यां स्वापो ग्राह्यो निरन्तरम्।।105।।

यथाऽभीष्टास्तव प्राणाः त्वत्कृते हे नराधमाः।
तथैव सर्वजीवानां प्राणास्तेषामपि प्रियाः।। 106।।

सन्ति हीनबला यद्वा त्वच्छलेन प्रवञ्चिताः।
तत एव निहन्यन्ते युष्माभिः पशुपक्षिणः।। 107।।

अन्यथा ते क्षणेनैव हन्तुं युष्मानपि क्षमाः।
मिथ्यागर्वं ततो हित्वा धर्मवृत्तिं समाचर।। 108।।

इदं करोनाशतकं त्रिवेणीकविना कृतम्।
भूयात् करुणाशतकं जनानां परमार्थतः।। 109।।

पशुपक्षिवधाज्जातो विषाणुरतिदारुणः।
यथाऽऽतङ्कयते विश्वं सङ्केतस्तेन गृह्यताम्।। 110।।

स्वयम्भोः ससुखं जीव जीवयाऽन्यान् यथोचितम्।
जिह्वारसमेवादातुं मा मा प्राणहरो भव।। 111।।

समारभ्याऽपराह्णे ह्यः प्रातरद्य प्रपूर्यते।
अहो नु जयते नित्यं सेविता मे सरस्वती।। 112।।

अहमस्मि सरस्वत्या लिपिको लेखनीकरः।
साऽऽदिशत्यहमुद्ग्रीवः श्रुत्वाऽऽदिष्टं लिखामि च।।113।।

वर्णा वाक्यानि भावाश्च तस्या एवाऽखिलं, न मे।
तदीय एव सन्देशः पूरितश्शतकायते।। 114।।

इदं हि शतकं प्रातः पूर्यते बुधवासरे।
अष्टादशेऽह्नि मार्चस्य मुदा ख्रिस्ताब्दविंशतौ।।115।।

इति श्रीमद्दुर्गाप्रसादाभिराजीमध्यप्रसूनुना
कविसार्वभौमपदवीकेन महामहोपाध्यायब्रह्मर्षि-
कविपण्डितादिविरुदभाजाऽभिराजराजेन्द्रमिश्रेण
पद्मपुरस्कृतेन विरचितं करुणाशतकापराख्यं
करोनाशतकं पूर्णम्।

प्रातः 8.15, 18-03-2020 शिमला (हि.प्र.)

## पत्रस्य स्वामित्वसम्बन्धे अधिकृतं विवरणम्
### पत्रकम् 4 (नियम : 8)


| | | |
|---|---|---|
| 1. | प्रकाशनस्थानम् | - जयपुरम् |
| 2. | प्रकाशने कालावधिः | - मासिकपत्रम् |
| 3. | मुद्रकस्य नाम | - द्वारा - न्यू जय शिवा प्रिन्टर्स |
| | नागरिकता, संकेतः | - भारतीयः, गोपालबाडी, जयपुरम् |
| 4. | प्रकाशकस्य नाम | - माणकचन्दमाहेश्वरी |
| | नागरिकता, संकेतः | - भारतीयः, भारतीभवनम्, बी-15, न्यूकॉलोनी, जयपुरम्। |
| 5. | सम्पादकस्य नाम | - प्रोफेसर श्रीकृष्णशर्मा |
| | नागरिकता, संकेतः | - भारतीयः, भारतीभवनम्, बी-15, न्यूकॉलोनी, जयपुरम्। |
| 6. | पत्रस्य संपत्तेः अधिकारस्यांशभाजां वा जनानां संस्थाया वा नामसंकेतः | - "भारतीय-संस्कृत-प्रचार-संस्थानम् राजस्थानम् जयपुरम्" |

अहं माणकचन्दमाहेश्वरी घोषयामि यद् उपरिलिखितं विवरणं मद्विश्वासेन परिज्ञानेन च सत्यमस्ति।

दिनांकः 01-03-2020

# कोरोना वायरस से सावधानियां

❑ कैलाश चतुर्वेदी

**कोऽपि न बहिरागच्छेत् गृह एव च तिष्ठतु।**
**पालयतु च राजाज्ञां कोरोना किं करिष्यति।।1।।**

**भावार्थ**- कोई भी बाहर न निकलें घर पर ही रहें। सरकार के निर्देशों का पालन करें तो कोरोना क्या करेगा अर्थात् कोरोना कुछ भी नहीं कर सकता।

**रोधयतु स्वकीयान्वै परस्परञ्च मेलनात्।**
**अन्तः रक्षतु पर्याप्तं कोरोना किं करिष्यति।।2।।**

**भावार्थ**- अपने निजी प्रेमी लोगों को भी मिलने से रोकें, तथा परस्पर पर्याप्त दूरी रखें तो कोरोना क्या करेगा अर्थात् कोरोना कुछ भी नहीं कर सकता।

**नाशयतु च कोरोनां नीत्वा रोगाणुरोधि च।**
**उष्णोदकं च पानेन कोरोना किं करिष्यति।।3।।**

**भावार्थ**- रोगप्रतिरोधक अर्थात् विषाणुरोधक (एन्टीबायटिक) का सेवन कर कोरोना का विनाश करें। यदि गर्म पानी का सेवन करें तो कोरोना क्या करेगा अर्थात् कोरोना कुछ भी नहीं कर सकता।

**वारयतु च कोरोनां तुलसीसेवनेन च।**
**हस्तौ प्रक्षालनात्सुष्ठु कोरोना किं करिष्यति।।4।।**

**भावार्थ**- तुलसी का सेवन कर कोरोना का निवारण करें। यदि हाथों का बार बार अच्छी तरह से प्रक्षालन करें तो कोरोना क्या करेगा अर्थात् कोरोना कुछ भी नहीं कर सकता।

**यदा भवति सन्देहः गच्छतु वैद्य-सन्निधौ।**
**पालयतु च वैद्याज्ञां कोरोना किं करिष्यति।।5।।**

**भावार्थ**- जब किसी प्रकार का सन्देह हो तो चिकित्सक के पास जावें एवं चिकित्सक की सलाह का पालन करें तो कोरोना क्या करेगा अर्थात् कोरोना कुछ भी नहीं कर सकता।

**रक्षकाः यत्र सर्वेषां सदा वैद्यचिकित्सकाः।**
**तत्पर एव आरक्षी कोरोना किं करिष्यति।।6।।**

**भावार्थ**- जिस जगह सदैव वैद्य एवं चिकित्सक रक्षक हों एवं आरक्षी (पुलिस आदि) हमेंशा कर्त्तव्य के प्रति जागरुक हों तो कोरोना क्या करेगा अर्थात् कोरोना कुछ भी नहीं कर सकता।

**सक्षमाः भारतीयाश्च आत्मनि स्वास्थ्यरक्षणे।**
**शंकरो रक्षको यत्र कोरोना किं करिष्यति।।7।।**

**भावार्थ**- जहाँ भारतीय सदैव स्वयं के स्वास्थ्य-रक्षण हेतु सक्षम हो तथा जहाँ भगवान् शिव जिनके रक्षक हों तो कोरोना क्या करेगा अर्थात् कोरोना कुछ भी नहीं कर सकता।

**स्वच्छताभियानाद्धि निर्मलोऽयं भारतः।**
**निगदति हि कैलाशः कोरोना किं करिष्यति।।8।।**

**भावार्थ**- **कैलाश ( चतुर्वेदी )** का कहना है कि जहां स्वच्छता आदि अभियानों से जो भारत देश निर्मल (स्वच्छ) हो तो वहाँ कोरोना क्या करेगा अर्थात् कोरोना कुछ भी नहीं कर सकता।

**( चिड़ावा राजस्थानम् )**

अत्र सप्तसु श्लोकेषु 'को-रो-ना-वा-य-र-स' वर्णानामादौ क्रमतः प्रयोगात् 'कोरोनावायरस' इत्यस्याभिव्यक्तिर्विहिता। (सं.)

# विनायकसहस्रसिद्धे

(गताङ्कादग्रे)

❑ पं. राजेन्द्रमोहनशर्मा

यथैव सूर्यरश्मिभिः सह नीलसागरतटे मन्थरगत्या समायातः, मूषकस्तमपश्यत् दृढं कफोणिना लक्षमताडयत् पश्य विनायकम्। लक्षस्तीव्रगत्या विनायकमन्वसरत्। लक्षमूषकयोः पदचापं श्रुत्वापि विनायको नावतिष्ठत्। यदा तौ समीपमागच्छतां तदा विनायकस्तयोः प्रश्नं विनैवोदतरत्, युवां नैव चिन्तयतम्, अहं स्वस्थोऽस्मि। आश्वस्तभावेन लक्षोऽवदत् इति तु आवां जानीवः। वयं तु केवलम् इदं पश्यामो यत् भवान् कस्मिन्नपि-अज्ञातशिलाखण्डे गत्वा समाधिस्थो न भवेत् ततः आवां भवन्तमन्वेषयन्तौ नैकानि प्रहराणि यावत् वनेऽभ्रमाव। विनायकः परिहासं कुर्वन्नवदत् अहो यदि तथा अभविष्यत्। मूषकं दृष्ट्वाकथयत् वराकस्यास्य क्षुधा तु वर्धिता अभविष्यत्। मूषकोऽवदत् नास्ति अस्यावश्यकता रात्रिजागरणेन मम क्षुधा जिह्वा च चपले अभूताम्। अतः संप्रति तु निर्दिशन्तु यदस्माकं प्रातराशस्य का व्यवस्था विद्यते? विनायकः उपाधिपतिदायित्व-संवलितं गणमिङ्गितं चकार। केतनोऽवदत् वस्त्रनिर्मिता-वासानां द्वितीये भागे प्रातराशस्य पूर्णा व्यवस्था वर्तते भवन्तश्चलित्वाऽऽनन्दं प्राप्नुवन्तु।

कदलीफलानि नारिकेलानि आम्राणि अमरुदानि अनारफलानि च सन्निहितानि आसन्। मोदकानां स्थाल्यः तत्र सज्जिताः आसन्। एकस्मिन् वृहत्कटाहे दूर्वानां स्वादिष्टं खीचडा सन्निहितोऽविद्यत। सर्वे मिलित्वा प्रातराशस्यानन्दमन्वभूवन्। मूषकः किञ्चिदधिकम-भक्षयत्। विनायकस्य मनः प्रातराशेऽपि नालगत्। स अन्यमनस्क एव किञ्चित् प्रातराशमकरोत्। तदनन्तरं शनैः शनैः स्व विश्रामकक्षेऽ गच्छत्।

विनायकोऽचिन्तयत्-अस्मिन् पर्वतीयक्षेत्रेऽवश्यं कश्चन महाशक्तिशाली कोऽपि अधिपतिर्वसति। मन्दिर-निर्माणकौशलेन प्रतीयते यत् तस्य क्षेत्रे श्रेष्ठाः कलाविदो वास्तुशिल्पकाराः विद्यन्ते। किञ्चित्कालानन्तरं नित्य-कर्मणा न्यवर्तत। ततः देवदारुवृक्षसमीपस्थिते उन्नते शिलाखण्डे उपाविशत्। तत्रोपविश्य विनायकः साधनाकृते ध्यानमायोजयत्। किञ्चित् क्षणानन्तरमेव कर्णयोः स पुनः नूपुरध्वनिमशृणोत्। प्रयासेनापि स तेन ध्यानं दूरीकर्तुं नाशक्नोत्। प्रहरद्वयं यावदित्थमेव प्रायतत।

यथा यथा स साधनायै स्वकीयध्यानं भुकुटिमध्ये केन्द्रितं करोतिस्म तथा तथा चपलविद्युदिव रेखाः गोलाकारेण केन्द्रमूलबिन्दावायान्तिस्म। हताशो विनायको ध्यानमत्यजत्। किञ्चित् कालं यावत् स स्वकीयावासे एवाभ्रमत्। पुनर्बहिरागत्य पर्वतानामुन्नतान् शिलाखण्डान् लङ्घयित्वाग्रेऽवर्धत।

स व्यचारयत् मयाऽस्मिन् क्षेत्रे भ्रमित्वा ज्ञातव्यं यदस्याधिपतिः कुत्र निवसति? तदीयक्षेत्रं कुत्रपर्यन्तं विततमस्ति? दीर्घयात्रानन्तरमपि विनायको न किमप्यजानात्। स श्रान्तो भूत्वा परास्तः संजातः। शनैः शनैः प्रसरता सान्ध्यकालीनतमसा तत् पर्वतीयक्षेत्रं गाढं कृष्णवर्णं संजातम्। विनायकस्तत्रैवैकस्य वृक्षस्याधो विश्रमितुं निर्णीतवान्। श्रान्तो विनायकः एकस्य वृक्षस्याधः उपवेशनेन सहैवाशेत। निशायाः प्रहर-

द्वयानन्तरं सहसा गजानां चिङ्घाडस्य शब्दः धावतां पशूनां रवश्च श्रुतिपथमागतः। सावधानो विनायकः उदतिष्ठत्। सः स्वकक्षे संस्थापितानि शस्त्राणि सम्यगपश्यत् सम्मुखे अन्धकारे च किञ्चित् द्रष्टुं प्रायतत। स-अन्वभवत् यत् गजसमूहस्तन्निकटे-एव समायाति। विनायकः पार्श्वे पतितं काष्ठमुत्थाप्य संघर्षणेनाग्निम् प्रज्वालयत्। द्वाभ्यां हस्ताभ्यां प्रज्वलन्तं काष्ठं गृहीत्वा सम्मुखे-अपश्यत्। एकं बलिष्ठं गजं शीघ्रगत्या आत्मानं प्रति आगच्छन्तं ददर्श। वस्तुतस्तु यदा गजसमूहो निम्नभागस्थायां नद्यां जलं पीत्वा गच्छतिस्म तस्मिन्नेव समये आरण्यकसिंहा-नामेकः समूहो गजशावकमेकमहनत्। गजसिंहयोरस्मिन् युद्धे शेषाः गजास्तु सुरक्षिता अतिष्ठन् परन्त्वेका करिणी सिंहस्य नखैर्घातिता जाता। क्षतेन दुःखिता करिणी। गजसमूह उपरि गच्छन्नासीत्। तदैवाग्रे चलन्तं गजं मानवगन्धो विचलितं चकार। अन्धकारो दुर्गममार्गे सघनानि काननानि गजेभ्योऽधिकं सुरक्षितानि रुचिकराणि च स्थानानि विद्यन्ते। गजानामेव समूहः शनैः शनैः विनायकं परितः समतिष्ठत्। विनायकस्य सुरक्षायै द्वौ प्रज्ज्वलन्तौ शुष्ककाष्ठ- दण्डावेवास्ताम्। विनायकस्तीव्रगत्या तावेव परित आत्मरक्षायै-अभ्राम्यत्। तस्याप्रत्याशितेन व्यवहारेण गजसमूहो विवशः दूरे पलायितः। परन्तु एको बलिष्ठो गजस्तस्य सम्मुखे-एवातिष्ठत्। स एव गजसमूहस्य नेताऽवर्तिष्ट। स स्वस्थानात् अणुमात्रमपि नाचलत्।

विनायकः शीघ्रमेव त्वरितगत्या वायौ-उत्प्लुत्य तत्क्षणमेव प्रमुखगजसम्मुखमागत्य प्रज्वलन्तौ कीचकौ तमदर्शयत् परन्तु सहसैव स गजो विनायकहस्ताभ्यां ज्वलन्तौ द्वावपि कीचकौ स्व- शुण्डेनाकृष्य विनायकं न केवलं प्राक्षिपत् अपितु विनायकं स्वशुण्डदण्डे संस्थाप्य वायौ प्राक्षिपत्। वायौ-उच्छलद् विनायकः सघनस्यैकस्य वृक्षस्य सुदृढां शाखामपश्यत्। मन्ये सा तमेव प्रतीक्षतेस्म। सः शीघ्रमेव संतुलनं साधयन् तां शाखां सुदृढं गृहीत्वा-उत्प्लुत्य तस्योपरि-उपाविशत्। किञ्चित् कालं यावत् गजस्तस्य पतनं प्रतीक्षतेस्म। स अविचारयत् यो मानवो मया उक्षिप्त स भूमौ पतिष्यति, ततः अहं पादाभ्यां धर्षयित्वा तं दण्डयिष्यामि।

विनायकः किञ्चित् कालं-शाखायामुपाविशत्। अग्रे कथं योद्धव्यमिति विचारयन्नेवासीत् परन्तु स तत्क्षणमेवापश्यत् यत् स गजः शीघ्रमेवाग्रे आगत्य तं वृक्षं कम्पयति। अधुना विनायकः शीघ्रमेवोत्प्लुत्य गजमस्तके समुपविश्य तस्य कर्णयोरधो मृदु त्वचि अंकुशेन प्रबलप्रहारमकरोत्। गज अनेनाप्रत्याशितेनाक्रमणेन भयङ्करं कष्टमन्वभूत्। कानने कदापि केनापि हिंसकेन पशुना अथवा नरसमूहेन स प्रमुखो गजो नित्यं विवशो नाकारि। किञ्चित् कालं यावत् गजः मस्तके स्थितं पुरुषमधः पातयितुं नैकप्रकारेण प्रायतत। परन्तु यथा यथा गजः उपरि विराजमानं विनायकं पातयितुं प्रायतत तथा तथा विनायकः स्वतीक्ष्णेनाङ्कशेन गजमच्छिनत्। विनायकगजयोरिदं युद्धं सर्वे गजाः दर्शकाः भूत्वा अपश्यन् प्रहरद्वयं यावदिदं युद्धं प्राचलत्। परन्तु विनायकोऽस्थिरो नैव संजातः। अन्ते श्रान्तो गजः एकत्रातिष्ठत्। किञ्चित् कालानन्तरं विनायकः गजस्य कर्णयोरधो भागे अङ्कुशं स्थापयित्वाग्रे चलितुमिङ्गितं चकार। शनैः शनैः गजः इङ्गितां दिशां प्रति प्राचलत्। सम्पूर्णो गजसमूहः स्वनेतारमनुसरन् तथैव प्राचलत् यथा युद्धे पराजितः कोऽपि सेनापतिः स्वसेनया सह समर्पणाय

गच्छति। गजानां विशालसमूहेन सह विनायकः प्रत्यावर्त्य स्वकीयसागरक्षेत्रे समागच्छत्।

मूषकलक्षनायकोपनायका सर्वे स्तब्धाः सन्तो विनायकं गजराजोपरिसमानं दृष्ट्वात्यन्तमानन्दमन्वभूवन्। अद्य प्रथमवारं विनायकः काननस्य हिंसकगजानामुपरि अतिकौशलेन नियन्त्रणमकरोत्। विनायकः स्वकीयमाधिपत्यं स्वीकर्तुमपि विवशं वाध्यञ्चाकरोत्।

विनायको यथैव स्वकीयगणसमूहसमीपमागच्छत् उत्प्लुत्य सरलोऽतिष्ठत्। स नायकगजस्य कर्णे शनैरब्रवीत्। मित्र! अस्माकं गणसमूहे तव स्वागतं कुर्मः। वयं तव मित्राणि स्म न तु शत्रवः। अस्माभिः सह निवसतु आनन्दं च करोतु। आत्मविश्वासपूर्णः प्रेमपूर्णः प्रथमो हस्तः प्रसन्नवातावरणे यदा गजोपरि स्थापितः तस्मिन् महाबलशालिनि गजेऽनुकूलः प्रभावः संजातः। सूर्यस्य प्रकाशे प्रथमबारं विनायको गभीरदृष्ट्या यदा गजमपश्यत् तदा तेन ज्ञातं यद् वस्तुतोऽयमन्यगजापेक्षयातिविशालो भिन्नः श्वेतरङ्गस्य गजो विद्यते। स्वसमूहे स एक एव एतादृशो गजोऽविद्यत यो विशिष्टालङ्करणं विनैव गजराजः प्रतीयतेस्म। विनायकः पुनः गजस्य सम्मुखे समागत्य स्वकीयवामपादं विनाम्य दक्षिणजानुं तदुपरि संस्थाप्य वीरासनमुद्रायामुच्चैरवदत् मित्र। ऐरावत! अद्यप्रभृति भवानेनैव नाम्नास्माकं दले परिचाययिष्यति। भवतः हार्दिकमभिनन्दनं स्वागतं च विद्यते।

विनायकस्य विनम्रतापूर्वकं स्वागतम् अभिनन्दनञ्च स्वकीयदलस्यान्यसहचरानिङ्गितवान्। तदनुसारं किञ्चित् कालान्तरमेव ऐरावतस्य सम्मुखे कदलीफलानि हरिता दूर्वा तथान्या खाद्यसामग्री बाहुल्येन समुपस्थापिता। ऐरावतः शनैः शनैः कदलीफलानि अभक्षयत् घटिकैकानन्तरं स स्वकीयाग्रभागस्य द्वौ पादौ विनाम्य स्वशुण्डमुत्थाप्य विनायकमभिववन्द। तस्य नेत्राभ्यां स्रवन्तोऽश्रुकणाः प्राद्योतयन् यत् प्रथमबारमीदृशः कोऽपि जनोऽमिलत् योऽस्माभिः सह मित्रवद् व्यवहरति न च किमप्यनुचितं व्यवहारं करोति। ऐरावतो विगतवर्षेषु मारकपुरुषैः (शिकारी) गुप्तरूपेण समागत्य परितः परिभ्राम्य छलेन तस्य सहयोगिनो गजानध्नन्। न केवलमध्नन् अपितु सहस्रसंख्याकानि तेषां दलानि त्रोटयित्वानयन्। विनायकस्य सहचराः गजानां लघुलघूपसमूहाः अरचयन्, तदनन्तरं तेषां भोजनव्यवस्थामावासव्यवस्थाञ्चाकार्षुः। अद्य विनायकः पूर्णः सन्तुष्टोऽविद्यत। काननस्य शक्तिशालिगजानां साहचर्यं लब्ध्वा स अतीव प्रसन्नः संजातः। स्वदलस्य वर्धमानां शक्तिं विलोक्य विनायकोऽग्रिमां रणनीतिमचिन्तयत्। स अचिन्तयत् पूर्णरूपेण शक्तिसामर्थ्यसाधनानि च यदा भविष्यन्ति तदैवाग्रिमं रचनात्मकं कार्यं प्रारप्स्यते। विनायकः सम्यगजानात् यत् महान्तं लक्ष्यमधिगन्तुं केवलमन्धभक्ता- अनुयायिन एव न भवेयुः। अतः स निश्चयमकरोत् नवविचारकान् नवसंकल्पकान् ऊर्जासंवलितानेव दले संमेलयिष्यति। ये आसन्नसंकटे जानीयुः तथा भविष्यत्कालस्य रणनीतिनिर्माणे सिद्धहस्ताः स्युः।

**( प्राचार्यः )**
**पुरानी बस्ती, चांदपोल बाजार, जयपुर**

प्रसारण-युव-दिवसः

# युव-प्रेरकः श्रीविवेकानन्दः

❑ डॉ. अनीता अग्रवालः

अहम् अद्य सर्वप्रथमं भारत-वसुन्धरां सादरं वन्दे या समये-समये परित्राणाय साधूनां विनाशाय च दुष्कृतां धर्मसंस्थापनार्थाय च नानावतारान् साधु-सन्त-महात्मनः च प्रसूतवती अद्यापि तया प्रसूयते च। एषु एव महात्मसु स्वामिरामकृष्ण-परमहंसस्य परमप्रियप्रधान-शिष्य-श्रीस्वामिविवेकानन्दस्य अपि नाम सर्वस्मिन्नपि विश्वे सुविदितम् अस्ति।

अनेन युवावस्थायां यानि यानि अद्भुतानि कर्माणि कृतानि, तानि अद्यापि सर्वविधसुख-शान्ति-प्राप्त्यर्थं प्रेरकाणि सन्ति। अयं न केवलं बङ्गमातृभाषायाः एव विज्ञाता अवर्तत, अपितु संस्कृतस्य अपि उत्कृष्टः ज्ञाता तथा विदेशि-भाषायाः अंग्रेज्याः अपि सुविज्ञः आसीत्। अत एव तु अयं विदेशेषु भारतीय-संस्कृतेः सम्यक् प्रचार-प्रसारौ कृतवान्।

सर्वधर्मसमभावः अस्यामेव भारतीय-संस्कृतौ निहितः आस्ते।

इयं संस्कृतिः भारतीय-समग्र-संस्कृत-साहित्ये प्रचुर-मात्रायां मिलति। स्वजीवने युवक-विवेकानन्देन समाजे प्रसृताः अनेकाः कुरीतयः, दुराचाराः, उपद्रवाः, अवलोकिताः आसन्। अतः समग्र-भारतीयेषु आत्मीयतां सन्देष्टुम् अयं समये-समये स्वभाषणेषु जनान् प्रार्थयते स्म। यदि एषः संस्कृत-वाङ्मयस्य अनुशीलनं न अकरिष्यत् तर्हि कदापि स्वोद्देश्ये सफलो न अभविष्यत्।

युवकान् प्रेरयितुम् एव अस्य महामनसः स्मृतौ भारतवर्षे प्रतिवर्षं द्वादश-जनवर्यां युवदिवसः राष्ट्रीय-स्तरे मान्यते। अद्य तस्य एव एकशतोत्तर-षट्-पञ्चाशत्तमः जयन्ती-महोत्सवः अस्ति। अतः श्रीस्वामि-सम्बन्धे काचिद् इह चर्चा क्रियते। अयं प्रश्न-कर्तॄणां तु उत्तरं सटीकम् एव ददाति स्म।

(1) यथा- एकदा केनचित् पृष्टं यत् माता महीयसी किमर्थं भवति? स्वामिना उत्तरितं- "महाशय! पञ्चषट्क-परिमितं प्रस्तरखण्डं स्वजठरे बद्ध्वा श्वः प्रातः मां मिलतु।" प्रश्नकर्त्ता प्रातः उपस्थितः स्ववेदनां च स्वामिने निवेदितवान्। स्वामिमहोदयः प्राबोधयत्- "भवान् तु चतुर्विंशति-घण्टा-पर्यन्तमेव प्रस्तरभारं न सोढवान्। यदा हि माता भवन्तं नवमासपर्यन्तं गर्भे निधाय अपि सर्वं कार्यं कुर्वाणा अपि न श्रान्ता। अतः किमर्थं न सा महीयसी?"

युवानः एव कस्यापि राष्ट्रस्य-निर्मातारः संहर्त्तारः च भवन्ति। तेषाम् ऊर्जायाः सदुपयोगेन यदि निर्माणं, तर्हि दुरुपयोगेन संहारः एव। वर्तमाने याः याः अनभिलषिताः हानिकारिण्यः प्रवृत्तयः सन्ति, तासां मूले यूनां दुरुपयोगः दृश्यते। स्वार्थिनः नेतारः स्वार्थ-साधनाय स्वीयासु दुष्प्रवृत्तिषु तान् मेलयन्ति। लोभाकृष्टाः युवकाः कार्याकार्यं न विवेच्य तत्र स्वीयाम् ऊर्जां क्षपयन्ति। युवकाः आत्मानं यदि परिचिन्वन्तु, तर्हि ते अपि विवेकानन्दवत् विश्वशान्तिकारकाः भवेयुः।

2. एकदा एका विदेशि-युवतिः विवेकानन्द-सौन्दर्येण विमुग्धा सती तेन सह विवाहं कर्तुं प्रस्तावं कृतवती येन सा तत्सदृशमेव पुत्ररत्नं प्राप्नुयाद्। अस्य उत्तरं विवेकानन्दः एवं दत्तवान्- अहं तु संन्यासी अस्मि।

संन्यासिने विवाहः निषिद्धः। भवती मामेव पुत्रं स्वीकरोतु। विवाहोत्तरं मादृशः पुत्रः न जाने भवेत् अपि न वा? अनया घटनया अद्यतनाः युवानः शिक्षितुं शक्नुवन्ति यत् ते युवतिषु यद् दुराचरन्ति, किम् उचितं कुर्वन्ति?

3. एकदा केचन बालकाः स्वसमक्षम् अण्डान् निधाय प्रत्येकं वेद्धुं संलग्नाः आसन्, परन्तु असफलाः एव अजायन्त। अयं विवेकानन्दः तु तान् शिक्षयितुमेव एकैकशः कृत्वा सर्वान् अपि अण्डान् विद्धवान्, कथितवांश्च-एकाग्र-मनसा-कृतं कार्यं सर्वदा सफलमेव भवति।

4. एकदा एकः विदेशी सज्जनः स्वामिनं सम्बोधितवान्- 'हैलो' इति। अस्य उत्तरे स्वामी अवादीत्- 'नमस्ते!' 'अयम् अंग्रेजीं न जानाति' इदं विचिन्त्य सः विदेशी हिन्द्याम् अवदत्- "आप कैसे हैं?" स्वामिना उत्तरं दत्तम्- "I am fine, thank you" तदा विदेशी पृष्टवान्- "मम अंग्रेजी-भाषायाः उत्तरं भवान् हिन्द्यां किमर्थं दत्तवान्?" तदा स्वामिना कथितं- "यदा भवान् स्वकीयमातृभाषायाम् उक्तवान् तदा अहमपि स्वमातृभाषायाम् उत्तरं दत्तवान्। यदा भवान् मम मातृभाषायाः सम्माननम् अकरोत् तदा अहमपि भवतः मातृभाषायाः सम्मानम् अकरवम्।"

युवकान् सम्बोधयता एव स्वामि-विवेकानन्देन समये-समये एवं शिक्षाः प्रदत्ताः आसन् यत्-

1. उत्तिष्ठत, जाग्रत, तावत् मा तिष्ठत, यावत् लक्ष्यं न प्राप्येत।

2. ते एव जीवन्ति, ये परार्थं जीवन्ति।

3. जीवने अधिकाः सम्बन्धाः आवश्यकाः न, किन्तु ये सम्बन्धाः, तेषु जीवनम् अपेक्ष्यते।

4. यदि काचित् समस्या आगच्छेत्, तर्हि जानीत यत् यूयं असत्यमार्गे चलथ।

5. आकाङ्क्षा, अज्ञानता असमानता च एताः एव बन्धनस्य त्रिमूर्तयः सन्ति।

6. उच्च-मानवीय-मूल्यानि विना मनुष्यः महान् भवितुं न शक्नोति।

7. आत्मानं यः दुर्बलं मन्यते, सः महान् पापी अस्ति। धन्याः ते एव सन्ति, येषां सर्वस्वम् अन्येषाम् सेवायामेव विनश्यति।

8. यदि यूयं कस्यचित् उद्देश्यस्य कृते तिष्ठथ, तर्हि वृक्षः इव तिष्ठत। यदि पतथ, तर्हि एकं बीजम् इव पतत, येन पुनः उत्पद्य एकम् उद्देश्यं पूरयितुं शक्नुथ।

9. पवित्रतया, धैर्येण प्रयत्नेन च सर्वाः बाधाः अपसरन्ति। इह सन्देहः न, यत् महत्कार्याणि सर्वाणि शनैः शनैः एव सिध्यन्ति।

10. यद् वयं वपामः, तदेव कर्तयामः। वयम् एव स्वकर्मणा स्वस्य भाग्यस्य निर्मातारः स्मः। विश्वे अधिकांश-जनाः अनेन कारणेन असफलाः भवन्ति, यतः तेषु समये साहसं न सञ्चरति, ते भयभीताः भवन्ति।

11. शक्तिः जीवनम् अस्ति, निर्बलता मृत्युः। विस्तारः जीवनम् अस्ति, संकुचनं मृत्युः। प्रेम जीवनम् अस्ति, द्वेषः मृत्युः।

**व्याख्याता ( संस्कृत )**

**रा.उ.मा.वि. मण्डावरः ( पेच स्कूल )**

**दौसा ( राजस्थानम् )**

# २०७७-नूतनवर्षाभिनन्दनम्

❑ गगेन्द्रसिंह आर्यः

**सृष्टेः आदिदिवसः**- चैत्रमासस्य शुक्लपक्षस्य प्रतिपत्तिथौ सूर्योदये ईश्वरेण जगतः रचना प्रारब्धा। अतः सृष्टिसंवत्-कारणात् वर्षप्रतिपदायाः उत्सवः केवलम् भारतवासिनां अथवा हिन्दूनाम् एव नास्ति अपितु सम्पूर्णविश्वस्य तथा समस्तमानवीयसृष्टेः संवत्सरः वर्तते। यतो हि अयं सम्पूर्णब्रह्माण्डस्य नववर्षागमनस्य सूचकः अस्ति। सृष्टिसंवत्सर-1,96,08,53,122 वर्षः आरभते।

**भगवतः श्रीरामस्य राज्याभिषेकः**- त्रेतायुगे वनवासकालान्तिमसमये श्रीरामः रावणं हत्वा लंकायाः नरेशरूपेण विभीषणस्य राज्याभिषेकं कृत्वा पुनः अयोध्याम् आगत्य राजा अभूत्।

मर्यादापुरुषोत्तमस्य दशरथनन्दनस्य श्रीरामचन्द्रस्य राज्याभिषेकस्य मंगलतिथिः अपि चैत्रशुक्लप्रतिपदा एवासीत्। तदैव मंगलमयमुत्सवं स्मृत्वा वयं स्वगृहाणां द्वारेषु अभिनन्दनफलकानि ध्वजांश्च स्थापयामः।

**प्रभुझूलेलालस्य जन्मदिवसः**- चैत्रशुक्लप्रतिपदा-दिवसे सिन्धप्रदेशे झूलेलालरूपे वरुणदेवस्यैव जन्म जातम्। एतेषामेव नाम झूलेलालः अभवत्।

भगवता झूलेलालेन सिन्धवासिनां सहयोगेन विजयं प्राप्य वैदिकधर्मराज्यस्य स्थापना कृता। झूलेलालः समाजोद्धारं कृतवान्। अतः तेषां जन्मदिवसः अपि नववर्षपरम्पराया एकः नूतनप्रसंगः जातः।

**महाराजयुधिष्ठिरस्य संवत्**- द्वापरयुगस्यान्ते महाभारत-स्य युद्धानन्तरं धर्मराजः युधिष्ठिरः धर्मराज्यस्य स्थापनामकरोत्। तद्दिवसः अपि प्रतिपदा एव आसीत्। राजा युधिष्ठिरोऽस्मिन् दिवसे राजसिंहासने उपविष्टः ततः युधिष्ठिरसंवत् प्रारब्धः। अतः चैत्रशुक्लप्रतिपदायाः दिवसः एकः शुभकालः कस्यचिदपि कार्यस्य वर्तते।

**सृष्टिसंवत् युगाब्दश्च**- अस्मिन् वर्षे अस्माकं नववर्षः ख्रिस्ताब्दानुसारं 25 मार्च, 2020 (बुधवासरे) चैत्रशुक्लप्रतिपदा प्रारभते। द्वापरयुगस्य समाप्तेरनन्तरं कलियुगस्य प्रारम्भः जातः। तस्य युगाब्दरूपेण गणना भवति। वर्षप्रतिपदावसरे 5122 तमः वर्षस्य प्रारम्भः भविष्यिति।

**सम्राट्विक्रमादित्यस्य विजयदिवसः**- नववर्षप्रतिपदा मंगलमयोत्सवो माधुर्यपूर्णः उल्लासप्रदः वर्तते। अस्माकं गौरवशालि-इतिहासे अनेके महापुरुषाः अभवन्। तेषु स्वर्णयुगप्रणेता, हूणशकप्रभृतिदुष्टदलविजेता, नवसंवत्-संस्थापकः धर्मरक्षकः प्रजावत्सलः सम्राट् श्रेष्ठवीरः नृपः विक्रमादित्यः अभवत्। महाराजा विक्रमादित्यः दुःखभंजकः, न्यायादर्शः अमिततेजस्वी, महाप्रतापी आसीत्। यस्मिन् दिवसे विक्रमादित्यः राजसिंहासने उपविष्टः तस्मात् दिवसात् विक्रमसंवत् प्रारब्धः। यस्य २०७७ तमः वर्षः वर्षप्रतिपदादिवसात् भविष्यति। **ऐषमः 'प्रमादी' इति संवत्सर नाम वर्तते।**

**आर्यसमाजस्थापनादिवसः**- समाजसुधारकः युगद्रष्टा महर्षि-दयानन्दसरस्वती स्ववैचारिक-आन्दोलनस्य संघटनात्मकं स्वरूपं द्रढीकर्तुं भक्तानां सदाग्रहेण 7 अप्रेल

सन् 1875 अर्थात् वर्षप्रतिपदादिवसे यज्ञपश्चात् 100 सदस्यैः सह आर्यसमाजस्य विधिवत्स्थापनां मुम्बईनगरे कृतवान्। मुम्बईस्थिते गिरगांवस्थितायां माणिक-महोदयस्य वाटिकायां अद्य दिवसात् प्रायशः चतुर्दशदशकं पूर्वं स्थापितस्य आर्यसमाजस्य शाखाः देशे-विदेशेषु कोणे-कोणे प्रसारिताः। स्वामी दयानन्दः वेदानाम् तर्कसंगतां व्याख्यां प्रस्तुत्य 'सत्यार्थप्रकाशः' इति प्रसिद्धग्रन्थस्य रचनां कृतवान्। एवं वर्षप्रतिपदायाः पर्वणो गौरवतालिकायाम् आर्यसमाजस्य स्वर्णिम-अध्यायः अपि आरब्धः।

**डॉ. हेडगेवारस्य जन्मदिवसः**- राष्ट्रीयस्वयंसेवक-संघस्य जनकस्य सर्जनायाः प्रेरणापुंजस्य डॉ. केशवबलिराम-हेडगेवारमहोदयस्य जन्म अपि वर्षप्रतिपदावसरे (1 अप्रेल 1889) एव अभवत्।

**(प्रांतीय महामंत्री-आर्य वीर दल राजस्थान)**
**प्रधानाचार्य-गायत्री विद्या मंदिर उ.मा.वि. राजसमन्द।**
**जिला शिक्षण प्रमुख-संस्कृत भारती राजसमन्द**

# सूक्ति-सुधा

❑ **डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः**

**(15 वीं.श. आचार्य सकलकीर्ति रचित सुभाषित रत्नावलीतः)**

**वदत्यत्र जनाग्रेषु घटीघातेन प्रत्यहम्।**
**धर्मः संचीयतां पथ्यो गतेयं नागमिष्यति।।**

- मनुष्यों के आगे, घड़ी-घण्टा की टंकार प्रतिदिन यही कहती है, हितकारी धर्म का संचय करलो, क्योंकि बीती घड़ी फिर नहीं आवेगी।

**नित्यं संक्षीयते चायुर्हस्तन्यस्ताम्बुवत् क्षणम्।**
**कथं न क्रियते धर्मो बुधैः संविग्नमानसैः।।**

- आयु, हाथ में रखे हुये जल के समान प्रति पल क्षीण हो रही है, तब बुद्धिमान् संसार में भयभीत होकर धर्म को क्यों नहीं करते?।

**दिनं प्रति त्वया वत्स चिन्तनीयं मया कृतम्।**
**धर्मो दानं न वा नष्टमायुः खण्डं हि दुर्लभम्।।**

- हे वत्स, तुझे प्रतिदिन यह विचार करना चाहिये कि मेरे द्वारा धर्म व दान किया गया है या नहीं , क्योंकि निश्चय ये नष्ट हुआ आयु का खण्ड मिलना दुर्लभ है।

**धर्मं विना न नेतव्या चैका कालकला बुधैः।**
**यमदूतः समायाति नेतुं न ज्ञायते क्वचित्।।**

- बुद्धिमानों को धर्माचरण के बिना समय की एक कला नहीं खोना चाहिये। क्योंकि यमदूत लेने के लिये आ रहा है- यह कहीं ज्ञात नहीं होता।

**प्रातः श्रीजिनवन्दनादिकमपि कृत्वा गुरून्मानय,**
**त्वं शास्त्रं शृणु धर्मतत्त्वकथनं मध्याह्नकाले कुरु।**
**सद्देवार्चनपात्रदानमपरे काले च धर्माप्तये,**
**श्रीदेवस्तवनं च सौख्यसदनं मुक्त्यङ्गनाहेतवे।।**

- हे आर्य, प्रातःकाल जिनदेव की वन्दना करके, गुरुओं का सम्मान करो। तुम मध्याह्न समय में धर्म तत्व के रहस्य को कहने वाले शास्त्र को सुनो। अपराह्नकाल में सद्देव की पूजा-अर्चना तथा पात्रदान करो, धर्म की प्राप्ति के लिये मुक्ति रूपी अङ्गना के सुखदायक श्री देवस्तवन को करो।।

**22, श्रीजीनगर, दुर्गापुरा, जयपुर**

# लिङ्गमशिष्यम्, लोकाश्रयत्वात्

❑ जन्मेश मीणा

''लिङ्गानुशासनमशिष्यं लोकाश्रयत्वात्''। किन्नाम लिङ्गम् इति चेत् उच्यते ? ''पदानां लिङ्गम् स्त्रीलिङ्गं, पुंल्लिङ्गं नपुंसकलिङ्गं च यत् लीनं = गुप्तं गमयति = बोधयति, तल् लिङ्गम्। का पुनः लिङ्गस्य परिभाषा ?'' शाब्दिकदर्शनदृष्ट्या शब्दानां पदानां वा यद्यपि लिङ्गं भवति तत् प्रायः अशिष्यं (= शासयितुं योग्यं न) भवति। लोकाश्रयत्वात्, लीने कथं चार्थ-परिभाषयोः समन्वयः?

उदाहरणेषु - कथञ्च लिङ्गानि (स्त्रीलिङ्गानि, पुंलिङ्गानि, नपुसंकलिङ्गानि) पदानि पाणिनीय लिङ्गानुशासनेन अनुशासितानि भवन्ति, अथवा शिष्यानि (अनुशासनयोग्यानि) भवन्ति।

यथा लोके जीवानां गर्भावस्थायां लीनत्वात्-गुप्तत्वात् पुंलिङ्गस्य, स्त्रीलिङ्गस्य, नपुंसकलिङ्गस्य च ज्ञानं व्यक्तं न भवति, तथैव भाषाणां पदानाम् अव्यक्तावस्थायां लिङ्गानि अव्यक्तानि-अशिष्याणि भवन्ति, तस्मा-देवोच्यते- ''लिङ्गमशिष्यं लोकाश्रय-त्वात्'' इति महाभाष्यवचनवार्तिके।

यथा सदाशिवलिङ्गस्य अनन्तज्योतिस्वरूपञ्च विष्णुना व्यक्तरूपेण अनन्तत्वात् न ज्ञातं भवति। सत्यं च उक्तम् अधोभागे ज्योतिर्लिङ्गस्य अन्तं नाऽस्ति। अन्तस्य अव्यक्तत्वात्, तथैव भाषाणां-पदानां-लिङ्गानां लीनत्वात् अव्यक्तत्वात् काव्यशास्त्र-लोकशासनाभावात् लिङ्गानि शासयितुं योग्यानि न भवन्ति। एवञ्च लोको हि अनन्त ब्रह्माण्डस्य स्वरूपं धत्ते। अतः अनन्तब्रह्माण्डलोकस्य शब्दप्रयोगज्ञाना-भावात् लिङ्गानि निश्चितरूपेण स्पष्टतया च ज्ञातुं न शक्यन्ते।

**ब्रह्ममुरारिसुरर्चितलिंगम्,**
**निर्मलभासितशोभितलिंगम्।**
**जन्मजदुःखविनाशकलिंगम्,**
**तत्-प्रणमामि सदाशिवलिंगम्।।1।।**

**देवमुनिप्रवरार्चितलिंगम्,**
**कामदहनकरुणाकरलिंगम्।**
**रावणदर्पविनाशनलिंगम्,**
**तत्-प्रणमामि सदाशिवलिंगम्।।2।।**

**सर्वसुगन्धसुलेपितलिंगम्,**
**बुद्धिविवर्धनकारणलिंगम्।**
**सिद्धसुरासुरवन्दितलिंगम्,**
**तत्-प्रणमामि सदाशिवलिंगम्।।3।।**

**कनकमहामणिभूषितलिंगम्,**
**फणिपतिवेष्टितशोभितलिंगम्।**
**दक्षसुयज्ञविनाशनलिंगम्,**
**तत्-प्रणमामि सदाशिवलिंगम्।।4।।**

**कुङ्कुमचन्दनलेपितलिंगम्,**
**पङ्कजहारसुशोभितलिंगम्।**
**सञ्चितपापविनाशनलिंगम्,**
**तत्-प्रणमामि सदाशिवलिंगम्।।5।।**

**देवगणार्चितसेवितलिंगम्,**
**भावैर्भक्तिभिरेव च लिंगम्।**
**दिनकरकोटिप्रभाकरलिंगम्,**
**तत्-प्रणमामि सदाशिवलिंगम्।।6।।**
**अष्टदलोपरिवेष्टितलिंगम्,**
**सर्वसमुद्भवकारणलिंगम्।**
**अष्टदरिद्रविनाशितलिंगम्,**
**तत्-प्रणमामि सदाशिवलिंगम्।।7।।**
**सुरगुरुसुरवरपूजितलिंगम्,**
**सुरवनपुष्पसदार्चितलिंगम्।**
**परात्परं परमात्मकलिंगम्,**
**तत्-प्रणमामि सदाशिवलिंगम्।।8।।**
**लिङ्गाष्टकमिदं पुण्यं यः पठेत्, शिवसन्निधौ।**
**शिवलोकमवाप्नोति शिवेन सह मोदते।।**

यत् किमपि क्वचिदपि लोके लीनं भवति तद् अपि यदि लोकाश्रयेण गमयति बोधाय भवति तर्हि लोकाश्रयस्य लोकाश्रयाणां वा काव्यानां कोषाणां पुराणादीनां सम्पूर्णानां लोकाश्रयत्वात् लिङ्गं दृश्यते तर्हि ज्ञानं शक्यते बोधयितुम् इति भाष्यकाराणामाशयः। केवलं लिङ्गानुशासनं लिङ्गानि शासयितुं समर्थं भवितुं न शक्यते, इति।

तेन च ज्ञायते लिङ्गं लोके लुप्तं सदपि सर्वथा यद्यपि शासयितुं योग्यं नास्ति तथापि अदृष्टेषु लिङ्गेषु शासनं कथमपि कर्तुं शक्यते लिङ्गानुशासनात्, शिष्टव्यवहाराच्च। अतः भाष्योक्तं सङ्गच्छते **लिङ्गमशिष्यं लोकाश्रय-त्वात्।** तथ्यमिदमधोलिखितैः 'स्त्रियाम्' (पा. 4.1.3) इतिसूत्रस्थभाष्यवार्तिकैश्च सिद्ध्यति-

**स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः।**
**उभयोरन्तरं यच्च तदभावे नपुंसकम्।।**
**लिङ्गात् स्त्रीपुंसयोर्ज्ञाने भ्रुकुंसे टाप् प्रसज्यते।**
**नत्वं खरकुटी पश्य खट्वा वृक्षौ न सिद्ध्यतः ।।**
**नापुंसकं भवेत्तस्मिन् तदभावे नपुंसकम्।**
**असत्तु मृगतृष्णावत् गन्धर्वनगरं यथा।।**
**आदित्यगतिवत्सन्न वस्त्रान्तर्हितवच्च तत्।**
**तयोस्तु तत्कृतं दृष्ट्वा यथाकाशेन ज्योतिषः।।**
**अन्योऽन्यं वाश्रयं त्वेतत् प्रत्यक्षेण विरुध्यते।**
**तटे च सर्वलिङ्गानि दृष्ट्वा कोऽध्यवसास्यति।।**
**संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्ततः।**
**संस्त्याने स्त्यायतेर्डट् स्त्री सूतेः सप् प्रसवे पुमान्।।**

अतः भाष्योक्तं सङ्गच्छते लिङ्गमशिष्यं लोकाश्रय-त्वात्। तथा च तथ्यमिदं पूर्वलिखितैः भाष्यवार्तिकैः सिद्ध्यति। निष्कर्षतो गुणानामुपचयः पुंस्त्वम्, गुणानामपचयः स्त्रीत्वम्, गुणानां स्थितिः (सत्ता) नपुंसकत्वमिति विमर्शः।

**शोधार्थी,**
**राष्ट्रियसंस्कृतसंस्थानम्, जयपुरम्**

# प्रियं भारतम्

❑ पं. रमेशचन्द्रशर्मा
व्याख्याता

कामात्मनः नास्ति च किंचिदेव, स्वर्गं हि सर्वं खलु तत्कृते च।
प्रसक्तजीवस्य च लक्ष्ममेवम्, सुखं च भोगं ननु काममेवम्।। 81।।
सुखं हि भोगो ननु जीवनस्य, लक्ष्यं ब्रवीतीति सकामयोगी।
बुद्धिर्हि तस्य व्यवसायिका सा, विधीयते या न समत्वयोगे।। 82।।
शोकं च हर्षं सुखसाधनं च, पापं च पुण्यं प्रियमप्रियं वा।
विहाय रागं ननु पूर्णद्वेषम्, प्रियश्च कृष्णस्य हि जायते सः।। 83।।
भक्तः प्रसन्नः स्थिरभक्तियुक्तः, प्रासक्तिहीनः पुरुषश्च लोके।
द्वन्द्वैर्विमुक्तश्च सदा विरागी, प्रियश्च कृष्णस्य हि जायते सः।। 84।।
बुद्धिः समाधावचला स्थिता या, समत्वयोगे खलु जायते सा।
फलं विहायापि हि कर्मजं तत्, प्रियश्च कृष्णस्य हि जायते सः।। 85।।
निष्कामयोगी स्थितधीः प्रसन्नः, पापं च पुण्यं प्रजहाति लोके।
प्राप्नोति शान्तिं पुरुषश्च नित्यम्, प्रियश्च कृष्णस्य हि जायते सः।। 86।।
त्यजन्ति ये मोहमतिं स्वकीयाम्, स्थिता च येषां मतिः सांख्ययोगे।
नियम्य सर्वाणि हि इन्द्रियाणि, भवन्ति ते कृष्णप्रिया हि लोके।। 87।।
जनास्तु यज्ञाद्धि सदा प्रसन्नाःफलं लभन्ते सुविकासमेवम्।
कुर्वन्ति कर्माणि समत्वयोगे, भवन्ति ते कृष्णप्रिया हि लोके।। 88।।
देवाः प्रसन्नाश्च नराः प्रसन्नाः, यज्ञाद्धि सर्वे फलमाप्नुवन्ति।
यच्छन्ति देवाश्च फलानि तेभ्यः, सर्वाण्यशेषाणि सुखानि लोके।। 89।।
अन्नं जलं वस्त्रमनन्तवित्तम्, भूतानि सर्वाणि ह्यनन्तवृष्टिम्।
तथा हि यज्ञात् खलु सम्भवन्ति, लोकस्य कार्याण्यखिलानि प्रायः।। 90।।

लोभश्च मोहः सुखसाधनानि, कामोऽपि क्रोधो निजशत्रवश्च।
जित्वा तु सर्वानपि मर्त्यलोके, यस्त्वात्मतृप्तश्च सदैव जातः।। 91।।
देहान्मनस्तन्मनसस्तु बुद्धिः, बुद्धेः परं सोऽयमजो हि चात्मा।
एवं च बुद्ध्वा ननु कर्मयोगी, करोति कार्याणि तथैव लोके।। 92।।
दिव्यं च मत्वा ननु जन्ममृत्यू, त्यजन्ति गात्राणि च निर्मलानि।
व्रजन्ति ते ईशमनन्तमाशु, न विद्यते जन्म पुनश्च तेषाम्।। 93।।
ज्ञानं च लब्ध्वा परमं पवित्रम्, तत्त्वे च कृष्णे तु सदैव तृप्तः।
जितेन्द्रियश्चापि हि सत्यसङ्गः, प्राप्नोति सोऽयं परमेश्वरं च।। 94।।
शिवं शंकरं शोभितचन्द्रभालम्, कृपालुं महादेवमानन्दरूपम्।
विशालं भवं भूतराजं नतोऽहम्, सदा विश्वरूपं चिरं भीमरूपम्।। 95।।
ध्रुवं शाश्वतं खेचरं गोचरं च, स्थिरं सर्वविख्यातमीशं पवित्रम्।
प्रमाणं वरं सर्वदेवं महेशम्, भजेऽहं सदा लोकपालं कृपालुम्। 96।।
परं राजराजं विमुक्तं व्रतेशम्, विरामं गुहं देवसिंहं च सूक्ष्मम्।
वरेण्यं त्रिनेत्रं जटाशंकरञ्च विरूपं शरण्यं नमामीशमीड्यम्।। 97।।
शिवं शंकरं राजराजेश्वरं च, उमेशं सुवासं च भूतेश्वरं च।
सुधामं च गोपालमाषाढमाद्यम् प्रियं शंकरं सर्वकालं भजामि।। 98।।
महारूपमादित्यमादिस्वरूपम्, त्रिशूलं च मुण्डं वरिष्ठं नमामि।
प्रियं सिद्धदेवं सदा शूलपाणिम्, भजेऽहं च रामेश्वरं रामपूज्यम्।। 99।।
शिवं पार्थिवं सर्वभूतात्मरूपम्, महाकालरूपं तु मृत्युञ्जयं च।
अदीनं सुयोज्यं महाबाणहस्तम्, त्रिकालं सदा विश्वरूपं भजामि।। 100।।
सुरेशाधिपं मोक्षदं सत्यरूपम्, नमोंकाररूपं महेशं भजेऽहम्।
शिवं व्यापकं सर्वदेवाधिदेवम्, नतोऽहं विभुं सर्वलोकैकनाथम्।। 101।।
शिवं पार्थिवं त्र्यम्बकं विश्वमूर्तिम्, उमाप्राणनाथं च वन्दे सदाऽहम्।
प्रजापालकं रक्षकं चन्द्रभालम्, भजेऽहं ममेष्टं च राजाधिराजम्।। 102।।

सदा ताडकेशं च नाथं प्रजानाम्, जगद्बीजरूपं जगद्वन्दितं च।
महाकालकालं विशालं करालम्, भजामि प्रभुं पार्वतीशं सदाऽहम्।। 103।।
भुजङ्गाधिराजं सुसिद्धं सुसाध्यम्, गणं लोकपालं प्रियं शंकरं च।
त्रिशुक्लं च नन्दीश्वरं भावगम्यम्, भजेऽहं सदा प्राणनाथं परेशम्।। 104।।
प्रसन्नं महाङ्गं शिवं चारुलिङ्गम्, गुहावासिनं मालिनं यज्ञरूपम्।
खगं पक्षिराजं तु दिव्याम्बरं च, भजेऽहं सदा शंकरं मोक्षदं तम्।। 105।।
सदाहं शिवं लोकनाथं सतीशम्, सुरैः सेव्यमानं त्रिशूलं च रुद्रम्।
नमामीशमीशानदेवं महेशम्, महाभीषणं दिव्यरूपं त्रिनेत्रम्।। 106।।
नमो विश्वदेवाय कामाय पित्रे, अचिन्त्याय नित्याय वैद्याय मात्रे।।
विरामं विमुक्तं निरामं च घोरम्, नमाम्यादिदेवं शिवं शंकरं च।। 107।।
उमाप्राणनाथं परं सिद्धभूतम्, भवं सुन्दरं मोक्षदं स्वर्गदं तम्।
प्रजाबीजरूपं शिवं सुन्दरं च, भजेऽहं सदा सिद्धिदं सर्वसाध्यम्।। 108।।
भजेऽहं सदा चारुचन्द्रावतंसम्, पुरीं काशिकां काशिकाधीश्वरं च।
शिवं सुन्दरं सत्यमाद्यं प्रपूज्यम्, प्रियं शंकरं च प्रियं भारतं च।। 109।।
पशूनां पतिं लोकपालं महेशम्, प्रसन्नं वरं काशिवासं नमामि।
गणानां पतिं पंचवक्त्रं त्रिनेत्रम्, सदा विश्ववंद्यं शिवं शंकरं च।। 110।।
हरं व्यालरूपं प्रियं मंगलं च, हरिं रामरत्नन्तु रामेश्वरं च।
सुराधीश्वरं वन्दितं सर्वपूज्यम्, भजेऽहं भवानीशमात्मस्वरूपम्।। 111।।
प्रजानां पतिं सर्वदेवाधिदेवम्, शिवं त्र्यम्बकं विश्वरूपं महेशम्।
गुणं निर्गुणं सत्यरूपं विरूपम्, उमेशं महाकालरूपं भजेऽहम्।। 112।।

106, ग्रीनपार्क, बैनाड़ रोड़
दादी का फाटक, झोटवाड़ा, जयपुर-12

# वेदविमर्शः

❑ सत्यप्रकाशः गुप्ता

वेद इत्येतस्य पदस्य प्रयोगः मन्त्रब्राह्मणयोरर्थे विधीयते। आपस्तम्बे प्रोक्तञ्च-'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति[1]। येन हि यज्ञभागानामनुष्ठानं निष्पन्नतामुपैति देवतानाञ्च स्तुतिविधानमस्ति स मन्त्र इति (मननात् मन्त्रः) प्रोच्यते। 'ब्राह्माणम्' इत्येतत् पदं ग्रन्थ-विशेषवाच्यम्। यज्ञानां विविधक्रियाकलापप्रति-पादकग्रन्थाः 'ब्राह्मणम्' इत्येतां सञ्ज्ञां भजन्ते। तेन हि प्रधानतया द्विविधो वेदः- मन्त्ररूपो ब्राह्मणरूपश्च। मन्त्रसमुदाय एवात्र संहितापदेन व्यवहृतः। ब्राह्मणरूपो वेदभागस्तु संहिताभागस्य व्याख्यारूप एव। स चायं ब्राह्मणभागो यागस्वरूपबोधकतया प्रथितः। 'ब्राह्मणम्' इत्येतस्य पदस्य विविधार्थेषु एकोऽर्थस्तु यज्ञः। बृह् वर्धने धातोः निष्पन्नस्य ब्राह्मणशब्दस्यार्थोऽस्ति-वर्धनं विस्तारो वा वितानो वा यज्ञ इति। ब्राह्मणमपि भागत्रये विभक्तमस्ति-प्रथमो भागः ब्राह्मणमिति, द्वितीयो भागः आरण्यकमिति किञ्च तृतीयो भाग उपनिषदिति कथ्यते। यज्ञस्वरूपप्रतिपादको ब्राह्मणभागः। अरण्ये पठिताः यज्ञस्याध्यात्मिकं रूपं विवेचयन्तो वेदभागा आरण्यकानि, उपनिषदो ब्रह्मबोधकाः मोक्षसाधनानि, अयमेव भागो वेदस्यान्तरूपतया 'वेदान्त' इत्युच्यते। ब्राह्मणभागो गृहस्थानामुपयोगी। आरण्यकभागो वानप्रस्थमाश्रितानाम् उपनिषत्तु, संन्यस्तानामुपयोगीत्यपि कथयितुं शक्यते।

वेदस्तु वस्तुतः एक एवास्ति। किञ्च स्वरूपभेदात् त्रिविधोऽस्ति-ऋग्वेदः, यजुर्वेदः, सामवेदश्चेति। वेदे तावदेकं सन्तम् अतिमहत्वाद् दुरध्येयमनेकशाखाभेदेन समाम्नासिषुः। सुखग्रहणाय व्यासेन समाम्नातवन्तः।[2] सोऽयं वेदत्रयीति पदेन व्यवह्रियते, वेदरचनायास्त्रि-प्रकारकत्वेन त्रयीति कथ्यते ।

या खलु रचना पद्यमयी सा ऋक् या गद्यमयी सा यजुः। या पुनः समग्रा गानमयी रचना सा सामेति कथ्यते। तदुक्तं जैमिनिना- 'तेषामृग् यत्रार्थवशेन पादव्यवस्था, गीतिषु सामाख्या, शेषे यजुः शब्दःइति (द्वितीयाध्याये प्रथमपादे ३२/३३/३८ सूत्राणि)। यास्कस्तु- ता ऋचः परोक्षकृताः प्रत्यक्षकृताः आध्यात्मिकाश्चेति भेदात् त्रिविधा। ऋक्शब्दोऽत्र मन्त्रवचनः। यासु प्रथमपुरुष-क्रियास्ताः परोक्षकृताः, यासु मध्यमपुरुषक्रियास्तास्तु प्रत्यक्षकृताः यासु चोत्तमपुरुषक्रियास्ता आध्यात्मिकाः इति। अतः यत्र कुत्राऽपि प्राचीनग्रन्थे वेदार्थे 'त्रयी' ति पदं प्रयुक्तं, तत्र सर्वत्र रचनात्रैविध्यं मनसि निधाय बोध्यम् यत् ऋग्यजुसामाख्यास्त्रय एव वेदाः पूर्वमासन् तद् यथा-

अग्नेर्ऋचो वायोर्यजूंषि रवेः सामादिस्यात्।[3] अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्। दुदोह यज्ञसिद्ध्यर्थमृग्यजुः सामलक्षणम्।[4] अतो वेदानां त्रित्वादेव तत्र त्रयीति व्यवहारो यास्तवो न प्रकारभेदकृतः। किञ्च छान्दोग्योपनिषदि सनत्कुमारं प्रति नारदीय-मुक्तिरपि द्रष्टव्या। ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थम् ।

अनेन वचनेन वेदस्य चतुर्थत्वमपि सिद्ध्यति। ऋग्वेदेऽपि अथर्ववेदस्य नामोल्लेख अस्ति। भगवता पतञ्जलिनाऽपि चत्वारो वेदाः साङ्गाः सरहस्याः इति पस्पशाह्निके स्पष्टमुक्तम्। छान्दोग्यब्राह्मणे मनुस्मृतौ च यज्ञोपयोगिनो वेदा एव परामृष्टाः, नाभिचारिकाथर्ववेद इति त्रित्वमेव एवं परत्राऽपि। जैमिनिस्तु मन्त्राणां विप्रकारकतामेव लक्षितवान् न वेदसख्यां व्यवस्थापितवान्। अतो वेदाश्चत्वार एव, त्रयीति व्यवहारस्तु प्रकारकृतः। अथर्ववेदीयमन्त्रा अपि पूर्वोक्तप्रकारत्रयान्यतमरूपा एवेति। पूर्वमेव मया लिखितं मन्त्राणां समूह एव संहिता इत्येतेन व्यपदेशेन व्यपदिश्यते। यज्ञानुष्ठानं दृष्टौ निधाय विभिन्नर्त्विजां कृते संहितानां सङ्कलनं वेदव्यासश्चकार। वेदान् विव्यास यस्मात् स वेदव्यास इति स्मृतः (महा.)। मन्त्रसंहितानां सङ्कलनं चतुर्विधतया कृतम्। तस्मात्-संहिताः सन्ति चतस्रः-ऋक्संहिता, यजुःसंहिता, सामसंहिता, अथर्वसंहिता च। अतएव वेदाश्चत्वारः स्मृताः। आम्नायः, आगमः, श्रुतिः, वेदः इति सर्वे शब्दाः पर्यायाः। वेदाद् ब्रह्मधर्मयोः अथवा क्रियाज्ञानमयस्य ब्रह्मणो ज्ञानं भवति। विदन्ति एभिः धर्मब्रह्मणी, क्रियाज्ञानमयं ब्रह्म वा स वेद इति। अनेन विग्रहेण वेदशब्दः विद्ज्ञाने धातोः करणे घञ्प्रत्ययान्तः निष्पन्नो भवति। रुधादिगणीयविचारार्थक-विद्धातोरपि वेद इत्येतत्पदस्य सिद्धिर्भवति। विन्ते विचारयति धर्मब्रह्मणी क्रियाज्ञानमयं ब्रह्म वेति वेदः। अस्मिन् पक्षे पचादित्वात् विद्धातोरच्प्रत्यायाद्वेद-शब्दस्य सिद्धिर्भवेत्। वेदे ब्रह्मविषयकविचार-स्योदाहरणमेकं द्रष्टव्यम्-किंस्विद्वनं क उत वृक्ष आस यतो द्यावापृथिवीनिष्टतक्षुः। मनीषिणो मनसा पृच्छते उतघदध्यतिष्ठत् भुवनानि धारयन्।।[5]

**अस्योत्तरमपि द्रष्टव्यम्**

ब्रह्मवनं स ब्रह्म स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः। मनसा विब्रवीमि वो ब्रह्मधितिष्ठत् भुवनानि धारयन्।[6] वेद इत्येतेन पदेन ऋग्यजुषादिपद्यगद्य-गीतिनिबद्धस्य ग्रन्थात्मकस्य पदार्थस्यैव बोधो भवति, अथवा एतदतिरिक्तस्य ऋगादिपदेन कस्याप्यन्य-पदार्थस्यापि बोधो भवति? अस्योत्तरं तु स्पष्टमेव-

यदेतन्मण्डलं तपति तन्महदुक्थम्, ता ऋचः, स ऋचां लोकः। अथ यदेतद् अर्चिर्दीप्यते, तन्महाव्रतम्, तानि सामनि, स साम्नां लोकः। अथ य एष एतस्मिन् मण्डले पुरूषाः सोऽग्निः, तानि यजूंषि, स यजुषां लोकः। सैषा त्रय्येव विद्या तपति।[7] अनेन वचनेन सिद्धो भवति यद् ग्रन्थात्मक-ऋगाद्यतिरिक्तोऽपि ऋगादिसंज्ञकपदार्थ-स्यास्तित्वमस्ति। पदार्थोऽयम् वेद इति पदेन व्यपदिश्यते। ऋगाद्यर्थमेव त्रयं ब्रह्म सनातनम् (मनुस्मृतौ), सैषा त्रय्येव विद्या तपति (शतपथब्राह्मणे) इति, वेदास्त्रयस्त्रयी (अमरकोषे) इत्यादिवचनानुसारेण ब्रह्म विद्या एवं वेद इति त्रयाणां शब्दानां प्रयोगो भवति। अस्यैवार्थस्य सम्पुष्टौ तैत्तिरीयब्राह्मणस्यापीयमुक्तिः द्रष्टव्या-**ऋचं वाचं प्रपद्ये** अनेन वेदवाक्येन ऋक् पदमपि वाक् इत्येतत्पदेन व्यपदिश्यते। तेन हि वाचीमा विश्वा भुवनान्यर्पिता एवं कथ्यते। ऋगात्मकवाचा एव त्रिभुवनस्योत्पतिरभूत्। **मनो यजुः प्रपद्ये** इत्यनेन वेदवाक्येन यजुः मनः स्वरूपोऽस्ति। इदं मनः स्थितिगतिशीलत्वमस्ति। अयं वाव यजुर्योऽयं पवते, एष

हि यन्नेवेदं सर्वं जनयति एवं यन्तमिदमनु प्रजायते, तस्मात् वायुरेव यजुः (अयं वायुः पञ्चभूतान्तर्गतः स्थूलवायुः नास्ति) अयमेवाकाशोजूः (आकाशोऽपि षड्भूतान्तर्गतः आकाशो नास्ति, यदिदमन्तरिक्षम् एवम् आकाशमनुजयते) तदेतत् यजुर्वायुश्चान्तरिक्षं च, यच्च जुश्च तस्मात् यजुरेष एव होति।

अतएवेदं कथितम् - यजुः रूपाग्निः ऋक्-सामयोः प्रतिष्ठितोऽस्ति। तदिदं ऋग्वेदस्येयमृच् प्रकटयति-

अग्निः जागार तमृचः कामयन्ते। अग्निः जागार तमु सामानि यन्ति।[८]

अतएव सोमप्रधानाथर्ववेदस्यान्तर्भावः त्रयीवेदेष्वेव सैषा त्रय्येव विद्या तपति एवं कथितम्। वस्तुतस्त्वथर्वानामकस्य सोमस्य तत्रोपस्थितिः तं विना सूर्यः तसुं न शक्यते ।

ऋग्वेदस्याथर्ववेदस्य च रचनायाः यजुस्संहितायाश्च निर्माणं तु यज्ञभागविधानायैवाऽस्ति। यज्ञ-यजनहेतवे चतुर्णामृत्विजामावश्यकता वरीवर्ति। हौत्रकर्म-सम्पादनस्य श्रेयो होता-नाम्न-ऋत्विजं भवति। अयं होता ऋग्वेदस्य ऋचां पठित्वा समुपयुक्तानां देवानां यज्ञे आह्वानं करोति। अयं 'याज्या' तथा 'अनु-वाम्या' ऋचं पठति। अस्य पारिभाषिकं नाम शस्त्रमस्ति (अप्रणीतमन्त्र-साध्यास्तुतिः शस्त्रम्)

**ऋचां त्वः घोषमास्ते पुपुस्वान्**
**गायत्रं त्वो गायति शम्परीषु।**
**ब्रह्मत्वो वदति जातविद्यां**
**यज्ञस्य मात्रां विमिमीत उ त्वः।।**[९]

ऋच्यते स्तूयते यया सा ऋक्। तादृशीनामृचां समूह एव ऋग्वेदः। यत्रार्थवशेन पादव्यवस्था सा ऋगिति मीमांसकाः। चतुर्षु वेदेषु ऋग्वेदस्य गौरवं सर्वातिशायिनमस्ति। ऋग्वेदो हि धार्मिकस्तोत्राणां महान् विशालो निधिः। तत्र बहुभिर्भिन्नभिन्नैः ऋषिभिः सुललितैः भव्यैः शब्दैर्विभिन्नाः देवताः सादरं स्तुताः सन्ति।

पाश्चात्यदृशि भाषायाः भावस्य च विचारेणान्य-वेदेभ्योऽतीवप्राचीनोऽस्त्ययमृग्वेदः। भारतीयदृष्ट्याऽपि ऋग्वेदस्याभ्यर्हितत्वं पूजनीयता च सर्वत्र स्वीकार्यमस्ति।

यद्वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तत् यदृचा तत् दृढमिति।[१०]

### ऋग्वेदस्य विभागः

यद्यपि महाभाष्ये ऋग्वेदस्यैकविंशतिः शाखाः निर्दिष्टाः, परं शाकलवाष्कलाश्वलायनशांख्यायन-भाण्डकायननामधेयाः पञ्चशाखा सन्ति मुख्याः। स ऋग्वेदः सूक्तमण्डलभेदेन द्विधा विभक्तः । तत्र सूक्तं चतुर्विधम्- ऋषिसूक्तदेवतासूक्तच्छन्दःसूक्तार्थसूक्त-भेदात्। एकर्षिदृष्टमन्त्राणां समूहो ऋषिसूक्तम्, एकदेवताकमन्त्राणां समूहो देवतासूक्तम्। समानछन्दसां मन्त्राणां समूहो नामच्छन्दःसूक्तम्। यावदर्थसमाप्तानां मन्त्राणां-समूहोऽर्थसूक्तम्। सुष्ठूक्तत्वात्सर्वं सूक्तमित्या-ख्यायते। ऋग्वेदः सोऽयं मण्डलानुवाकभेदेन अष्टकाध्यायः सूक्तभेदेन च द्विधा, बालखिल्यसूक्तानि विहाय सम्पूर्णायाम् ऋग्वेदसंहितायां दशमण्डलानि, पञ्चाशीति अनुवाकाः, अष्टोत्तरशतमिताश्च वर्गाः अष्टौ

अष्टकानि, चतु:षष्टिर-ध्याया:, सप्तदशोत्तरसहस्राणि च सूक्तानि।

**अष्टकक्रम:**

समग्रऋक्संहिता अष्टाष्टकेषु विभक्तास्ति, प्रत्यष्टकमष्टाऽध्याया: सन्ति। अनेन रूपेण सम्पूर्ण ऋग्वेदश्चतु:षष्ट्यध्यायेषु विभक्तोऽस्ति। प्रत्येकमध्याय-स्यावान्तरविभागानां संज्ञा वर्ग इत्यस्ति। स अध्ययन-सौकर्याय एव विभागोऽस्ति। वर्गस्तु ऋचां समुदायस्य संज्ञाऽस्ति। किञ्च वर्गेषु-ऋचां संख्या अनिश्चिताऽस्ति। बहुधा पञ्चानां मन्त्राणामेको वर्गोभवति। किञ्चैक-मन्त्रादारभ्य नवमन्त्रपर्यन्तस्य वर्गो मिलति। सम्पूर्णे ऋग्वेदे वर्गानां संख्या षडधिकसहस्रद्वयमस्ति।

**मण्डल-क्रम:**

ऋग्वेदस्य द्वितीयोऽयं मण्डलक्रमविभाग: अतीव-महत्वपूर्ण अस्ति। ऐतिहासिकदृष्ट्या वैज्ञानिकदृष्ट्या चाप्यस्य महत्त्वमस्ति। बालखिल्यसूक्तानि विहाय सम्पूर्णायां ऋग्वेदसंहितायां दशमण्डलानि, पञ्चाशीति-श्चानुवाका:, अष्टोतरशतद्वयमिताश्च वर्गा: सन्ति। अत्र चानुवाकेषु सूक्तानि, सूक्तेषु मन्त्राश्च सन्ति। कात्यायनेन स्वकीयायां सर्वानुक्रमण्यां सर्वेषामष्टकानां संख्यातीव-परिश्रमेण निर्धारिता। अष्माकं प्राचीना: ऋषयस्तु वेदानां विशुद्धये तेषु प्रयुक्तानामक्षराणामपि गणनां कृतवन्त:। मन्त्रा दशसहस्रचतु:शतसप्तषष्टिमिता: (१०४६७) इति शाकल:, शौनकानुक्रमणी तु दशसहस्रपञ्चशताशीति-मितान् (१०५८०) मन्त्रान् आह। अत्र भेदे खिलभेदेन, कालभेदेन वा मन्त्रवृद्धिलोपावेव हेतुतयोऩ्रेयौ भवत:। शब्दसंख्या १५३८२६, अक्षरसंख्या-४३२०००। सर्वेऽपि मन्त्रा: चतुर्दशसु छन्द:सु बोध्या: । ऋग्वेदगत-मन्त्रदृष्टारो ऋषय: गृत्समदविश्वामित्रवामदेवात्रि-भरद्वाजव-शिष्ठादय: सन्ति। मण्डलानुसारेण सूक्तानां व्यवस्था निम्नप्रकारेण अस्ति-

१९१+४३+६२+५८+८७+७५+१०४+१०३+११४ +१९१।

**ऋचां दशसहस्राणि ऋचां पञ्चशतानि च।**
**ऋचामशीतिः पादाश्च पारणं सम्प्रकीर्तितम्।।**[११]
**शाकल्यदृष्टेः पदलक्षमेकं सार्धं च वेदे त्रिसहस्रयुक्तम्।**
**शतानि चाष्टौ दशकद्वयं च पदानि षट् चेति हि चर्चितानि।**[१२]

१. आप. परिभाषा . ३१
२. दुर्घटनिरुक्तवृत्तिः १/२०
३. छा.ब्रा. ६/१७
४. मनु. १/१३
५. ऋ. ११/६/८१/४१
६. तैत्तिरीयब्राह्मणम्
७. शतपथब्राह्मणम् १०/५
८. ऋ .५/४४/१५
९. ऋ. १०/७१/११
१०. तै.सं. ६/५/१०/३
११. अनुवाकानुक्रमणी
१२. अनु. ४५

**वरि. अनुसन्धाता,**
**केन्द्रीय सं.वि.वि. जयपुरपरिसरः**

# पद्मश्रीः मिश्रोऽभिराजराजेन्द्रः

❑ प्रोफेसर श्रीकृष्णशर्मा

संस्कृतजगतः सर्वप्रियरचनाकारो मिश्रोऽभिराज-राजेन्द्रः ऐषमः भारतीयशासनेन पद्मश्रिया सम्मानितः।

पृथुकलेवरमहाकाव्यद्वयेन, 27 खण्ड-काव्यैः सप्तनवगीतसंग्रहैः, अष्टगज़लसंग्रहैः (प्रायेण 700 गलज्जलिकाः) चतुर्भिर्नाटिका-नाटकैः, नवभिः एकांकि-संग्रहैः (85 एकांकीनि) सप्तकथानिकासंग्रहैः, विंशति-दण्डकैः, एकादशयक्षगानैः अभिराजय-शोभूषण-अभिनवरसमीमांसा-रङ्गदर्पणच्छन्दो-ऽभिराजीयप्रभृति- काव्यशास्त्रैश्च भगवत्याः सरस्वत्याः शेवधिं समृद्धं कुर्वन् निखिलेऽपि राष्ट्रे सम्यक् चकास्ति।

उत्तरप्रदेशीयजौनपुरजनपदे दुर्गा-प्रसादाभिराजीमध्यमसुतरूपेण लब्धजन्मा, इलाहाबादविश्वविद्यालये सम्प्राप्तोच्चशिक्षः, तत्रैव च पञ्चविंशति वर्षाणि यावदध्यापयन् देववाणीं प्रो. मिश्र इण्डोनेशियाराष्ट्रे बाली-द्वीपेऽपि वर्षत्रयं यावत् विजिटिंगप्रोफेसरपदं निर्व्यूढवान्। भारतमागत्य शिमलाविश्वविद्यालये आचार्याध्यक्षपदं निर्वहन्नसौ विश्वख्याते सम्पूर्णानन्द- संस्कृतविश्वविद्यालये कुलपतित्वं (2002-5) निरवहत्। सेवानिवृत्तोऽप्यसौ सम्प्रति मानवसंसाधन- मंत्रालयप्रवर्तित-साहित्याकादमीसंस्थायां दिल्ल्यां संस्कृत-परामर्शसमितिसंयोजकरूपेण (2018-2023) देववाणीयोगक्षेमौ निर्वहन् सक्रियस्संलक्ष्यते।

प्रायेण 250 कृतीनां सर्जकः प्रो. मिश्र ओजस्वी वक्ता, गभीरचिन्तकोऽध्येता, राष्ट्रार्पितमनाश्चास्ति। साहित्याकादमीकल्पवल्ली-वाचस्पति- म.म. राष्ट्रपति-वाल्मीकि-विश्व-भारतीप्रभृतिपञ्चाशत्-पुरस्कारैस्स-भाजितो मिश्रवर्यो हिन्दीभाषायाश्चापि मूर्धन्यरचनाकारो वर्तते। प्रायेण 48 शोधच्छात्राः सम्प्राप्त-डॉक्टरोपाधयस्तद्वाङ्मयं समीक्ष्य। तत्कृतयो-ऽनेकाः प्रायेण 13 विश्वविद्यालयेषु पाठ्यन्ते।

राजस्थानप्रान्तात् प्रकाशितयोः 'भारती' 'स्वरमङ्गला' संस्कृतपत्रिकयोः मिश्रवर्याणां काव्यानि शोधलेखाश्च प्रायेण प्रकाश्यन्त इति विदन्त्येव विद्वांसः, काव्यरसेन ह्यानन्दमनु-भवन्ति। कविवराणामेषां सारस्वतसाधना निरन्तरमितोऽप्युत्कर्षमाप्नुयादेतदर्थमेषां दीर्घायुष्यं नैरुज्यं च भूयादिति भवानीशङ्करौ प्रार्थये।

सम्पादकः, भारती संस्कृतपत्रिका

# अस्माकं गुरवः

( गताङ्कादग्रे )

❑ वेणीमाधव गो. धर्माधिकारी

दिनाङ्के 22, 23, 24 जनवरी 1966 दिनेषु संजातेऽस्मिन् सम्मेलने सम्पूर्णविश्वतः समागतेभ्यः प्रतिनिधिसदस्येभ्य अभूतपूर्वोत्साहस्य, एकात्मतायाश्चानुभूतिः सम्प्राप्ता। प्रयागे श्रीमद्भिर्गुरुभिर्विश्वहिन्दुपरिषदर्थं मार्गदर्शनार्थं कतिपयसूत्राणि प्रस्तावितानि।

## 1. समस्ता जातयः हिन्दव एव सन्ति

भारतस्योत्तरपूर्वाञ्चले अस्माकं बहुविधानां जनजातीनां बान्धवाः गोमांसं भक्षयन्ति, अत एव न ते हिन्दव इति इशुधर्मप्रचारकैः प्रचारः कृत आसीत्, सततं च कुर्वन्तिस्म। 1967 ई. वर्षे असमप्रान्तस्य गोहाटीस्थले सम्पन्ने विश्वहिन्दुपरिषत्सम्मेलने उपस्थितैः श्रीद्वारिकापीठशङ्कराचार्यैः, असम-वैष्णवसत्ताधिकारिभिश्च श्रीमद्गुरुभिश्चर्चा कृता, ताँश्चास्मिन् विषये सन्तुष्टान् कृतवन्तः, यज्जनजातयः सदा सर्वदा मूलतो हिन्दव एव। दीर्घकालं यावत् शेषहिन्दुसमाजेन संस्कृत्या च सम्बन्धविच्छेदेन हिन्दुधर्मस्य पूर्णस्वरूपात्ते दूरीभूताः नात्र तेषां दोषः।

तस्मिन्नेव दिने सायं सम्पन्नायां सार्वजनिकसभायां द्वारकापीठाधीशैः शङ्कराचार्यैरुद्घोषितं यद् भवन्तो जनजातीयाः बान्धवाः अपि हिन्दव एव। गोमांसभक्षणं भवतां कृते अनिवार्यमासीद् यतस्तदा तादृशेषु पर्वतीयप्रदेशेषु तत्समर्घं भोजनमुपलब्धमेव नासीत्। नात्र भवतां दोषः। घोषणामिमां श्रुत्वा सर्वे जनजातीनां नायकाः प्रतिनिधय प्रसन्नाः गौरवान्विताश्चाभवन्। इशुधर्मानुयायिनां कुप्रचारस्य साम्मुख्यं कर्तुं तेष्वात्मविश्वासो जागरितोऽभवत्।

## 2. हिन्दवः सोदराः सर्वे

1969 ई. वर्षे उडुपीनगरे सम्पन्ने विश्वहिन्दुपरिषत्सम्मेलने हिन्दुसमाजस्य पुनरुज्जीवनार्थमेकमैतिहासिकं कार्यं सिद्धमासीत्। मंचे हिन्दुधर्मस्य जैन-बौद्ध-सिक्ख-वीर-शैवादीनां सर्वेषां सम्प्रदायानां धर्माचार्याः, शङ्कराचार्याः पीठाधीशाः (हरिजन-पीठाधीशसहिताः) उपस्थिता आसन्। एतादृशानां 15000 प्रतिनिधीनां सम्मुखे सर्वेषां संयुक्तादेशानुसारं "हिन्दुधर्मेऽस्पृश्यतायै स्थानं नास्ति" इत्याशयस्य प्रदीर्घ एकः प्रस्तावः पारितः। सन्देशममुं सूत्ररूपे पेजावरस्य पूज्यमठाधीशैः नूतननाम्ना मंत्रः प्रदत्तः "हिन्दवः सोदराः सर्वे"। यदा प्रस्तावोऽयं पारितस्तदा श्रीमद्भिर्गुरुभिरप्यानन्दमयेन मनसा सूचनायां प्रदत्तायां पूर्णया सभया धर्माचार्याणां जयघोषेणाभिनन्दनं कृतम्, यस्मिन् गुरुमहाभागानामपि स्वरः सम्मिलित आसीदेव। मान यादवरावजोशीमहोदयानुसारं गुरुमहाभागानां सर्वोच्चानन्दमयः क्षण आसीत्।

## न हिन्दुः पतितो भवेत्

1966 ई. वर्षे प्रयागे सम्पन्ने कुम्भपर्वणः प्रथमे मंगलमये समये महत्त्वपूर्णमेकमन्यत्कार्यं संजातम्।

शताब्दीभ्यो हिन्दुसमाजस्य मनसि एका विकृता धारणा पुष्टासीद् यदेकवारं हिन्दुधर्मं परित्यज्य यदि कश्चिन्मुस्लिमधर्मं वा स्वीकरोति तस्य हिन्दुधर्मे पुनरागमनं वर्ज्यमासीत्। अनेन विकृतविचारेण एकपक्षीयः प्रचारः प्रचलित आसीत्। अन्यधर्मानुयायिनां सख्या वर्द्धमाना हिन्दूनां च क्षीयमाणासीत्। प्रयागसम्मेलने विश्वहिन्दुपरिषन्मंचेन शङ्कराचार्यसहितैः सर्वधर्माचार्यैरैकमत्येन घोषितं "न हिन्दुः पतितो भवेत्" अनेन अहिन्दूनामपि स्वपुरातने हिन्दुत्वे प्रत्यावर्त्तनं संभवमासीत्। तत्र हिन्दूनां पवित्रं कर्त्तव्यमित्यपि स्वीकृतम्। यद्यपि इतः पूर्वमपि आर्यसमाजबन्धुभिरेतत्कृतम्।

**अनुपमः पत्राचारः -**

श्रीभद्भिः गुरुभिः संघार्थं देशार्थं वा निरन्तरं केनापि प्रकारेण विशिष्टं मार्गदर्शनं क्रियमाणमासीत्। तेन सहैव ते देशस्य विविधैः श्रेष्ठपुरुषै, संस्थाभिः, संघहितैषिभिर्बन्धुभिः स्वस्य देश-विदेशवासिभिः स्वयंसेवकैः विशालमात्रायां पत्र-व्यवहारं कुर्वन्तिस्म। स्वहस्तेन, स्वसहायकैः श्रीमद्भिः डा. आबा जी थत्ते महोदयहस्तेन वा एष पत्राचारो जायमान आसीत्। पत्राणां वैविध्यं विषयभेदात्स्वाभाविकमेवासीत्। संभवतो महात्मानं गान्धिमहोदयं विहाय स्वजीवनकाले इयत्यां मात्रायामेतादृशः पत्रलेखको न सम्भवः। एवमपि वर्षे द्विवारं सम्पूर्णराष्ट्रभ्रमणं बहुकालपर्यन्तं तैः कृतम्।

**ब्रह्मपुरी, जयपुरम्**

---

**प्रेरकप्रसङ्गशतकम्** | **पंचाशीतितमः प्रसङ्गः**

# आत्मवत्सर्वभूतेषु

❑ **सौ. आराधना धर्माधिकारी**

प्रतिदिवसवन्मनोरमाऽद्यापि स्वयं पाकगृहे भोजनं पचतिस्म, परं प्रकृतेरस्वस्थतया मनो नैवासीत्कार्ये। कथमपि किञ्चिदपि सरलतमं भोजनं पक्वम्। तया बालकेभ्यो मेथिकामिश्रितकरपट्टिकाः कृताः आसन् येन, बालकेभ्यः कवोष्णं भोजनं मिलेत्। बालकानां विद्यालयादागमनवेला संजातैवासीत्। आगतेषु तेषु तया स्थाल्यः सज्जीकृताः। भोजनसमये तैः मात्रेऽपि भोजनं कर्त्तुं कथितम्। सा अवदत्-ममोदरे पीडाऽस्ति पश्चाद् भक्षयिष्यामि। कनीयान् बालकोऽवदत्-अहो त्वया पर्य्युषितमन्नं भक्षितं स्यात्। अद्यैव गुरुचरणैः कथितमासीत् पर्य्युषितान्नभक्षणेनोदरशूलं भवति। सर्वं पर्य्युषितान्नमवकरे त्यज मा भक्षय। तया स्वीकृत्यैकतो निक्षिप्य कथितम्-गृहसम्मार्जनकर्त्री आगमिष्यति तस्यै दास्यामि। बालोऽवदत्-तेन साऽपितु रुग्णा भवितुं शक्नोति। सा अचिन्तयत्-कीदृशः सुन्दरो विचारः बालकस्य मया तु चिन्तितमेव न। यावच्छक्यं पर्य्युषितमन्नं स्यादेव नेति प्रयतितव्यम्।

**"आत्मवत्सर्वभूतेषु यः पश्यति सः पण्डितः"**

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# श्रीकृष्णशरणमन्त्रस्तोत्रम्

राजस्थानीयः कविः पं. नथमलशास्त्री दाधीचः परिचित एव भारतीपाठकानां यो भक्तमालस्य संस्कृतानुवादकः, अनेकेषां स्तोत्रकाव्यानां च रचयिताऽस्ति। ''श्रीकृष्णः शरणं मम'' इति शरणमन्त्रमाधृत्य प्रतिपद्यं मन्त्रमिमं समुद्धरत् भक्तिकाव्यं श्रीकृष्णमन्त्रमहास्तोत्राख्यं क्रमशो भारत्यां प्रकाशितमभूत्। साम्प्रतं यथोचितविस्तरेण सह भक्तिकाव्यमिदं सानुवादं ग्रन्थाकारं प्रकाशितमिति ज्ञात्वा प्रसीदेयुः पाठकाः। अष्टसु विरामेषु विभक्तमिदं काव्यं भगवती टीका नामकहिन्दीव्याख्यया सह प्रकाशितमस्ति। प्रतिपृष्ठं मूलसंस्कृतपद्यानि, तदधस्तात् हिन्द्यां विस्तृता व्याख्याऽत्र द्रष्टुं शक्या। प्रतिविराममादावन्ते च ''श्रीकृष्णचन्द्रं शरणं प्रपद्ये'' इति मन्त्रेण सम्पूर्णतां नीतानि भक्तिपद्यानि कविना नूत्नतया संनिवेशितानि।

आदौ शुद्धाद्वैतप्रवर्तकवल्लभाचार्यवंशजानां विद्वन्मूर्धन्यानां मुम्बईस्थानां गोस्वामिश्याममनोहराचार्याणामाशीर्वचनम् ''अभिनन्दनम्'' शीर्षकवहं मुद्रितमस्ति, देवर्षिकलानाथशास्त्रिणः पुरोवागपि तदनन्तरं मुद्रिता। शरणमन्त्रस्य समधिकः प्रचारोऽनुसरणं च वल्लभाचार्यसम्प्रदाये भवति, वल्लभाचार्यवर्याणां प्रेरणा स्तोत्रकाव्यस्यास्य प्रणयने कारणभूतेति भूमिकायां कविः स्पष्टीकुरुते। चैतन्यमहाप्रभुस्मरणमन्येषामाचार्याणां चापि स्मरणं कृतमस्ति कविना।

पर्यन्ते नित्यस्वाध्यायार्थं ''गोविन्दमादिपुरुषं तमहं भजामि'' इति चतुर्थचरणेनापूर्यमाणानामेकादशपद्यानां ब्रह्मसंहितापञ्चमाध्यायादुद्धृता ब्रह्मस्तुतिरपि मुद्रिताऽस्ति, श्रीराधाकृष्णोपनिषदपि मुद्रिताऽस्ति या अथर्ववेदीयाऽस्तीति समुल्लेखोऽपि दृश्यते। अन्ते श्रीकृष्णोपनिषदपि मुद्रिता। ग्रन्थेऽस्मिन् मूल्यं न प्रकाशितमस्ति, श्रीभगवत्प्रीत्यर्थ-स्वाध्याय-सेवैवास्य मूल्यमिति सङ्केतः प्रारम्भे मुद्रितः, अतो निःशुल्कवितरणार्थमिदं काव्यं समर्पितमस्ति कविनेत्यपि सुतरामभिनन्दनीयः प्रयासः।

**श्रीकृष्णमन्त्रमहास्तोत्रम्, प्रणेता सम्पादकश्च आचार्य पं. नथमलशास्त्री दाधीचः, प्रकाशक पं. मालीराम दाधीचस्मृतिसंस्कृतसेवाशोधसंस्थान, वार्ड नं. 11, श्रीदधिमथी मन्दिरमार्ग, छापर, जिला चूरू, पृ.सं. 150.**

## जैनागमग्रन्थः

जैनागमस्य मूर्धन्येषु चूडान्तविद्वान्, असंख्यग्रन्थानां प्रणेता श्रीहरिभद्रसूरीश्वरो वैदुष्यस्य कृते सुविदितो देशे। मध्यकालिकेनानेन विदुषा 1444 ग्रन्थाः प्राणीयन्तेति प्रसिद्धिर्जैनसमाजे सुपरिज्ञाताऽस्ति। संस्कृते सुविमलशेमुषीप्रसूता अनेके ग्रन्थाः पद्यबद्धाः गद्यबद्धाश्च सन्ति विद्वत्प्रवरस्यास्य, प्राकृतभाषायामप्यस्य लेखनी निर्बाधरूपेण प्रचलति स्मेति प्रसिद्धम्। प्रौढदार्शनिकशैली एतस्य लेखने स्पष्टं दृष्टिगोचरीभवति। एतस्य विदुष एको ग्रन्थः सर्वज्ञसिद्धिप्रकरणाख्यः सपद्येव गुर्जरभाषीयानुवादेन, गुर्जरभाषीयव्याख्या-

विमर्शादिना च सह प्रकाशितोऽस्तीति ज्ञात्वाऽभूदस्माकं सुमहान् प्रमोदः।

ग्रन्थस्यास्य विवेचनं गुर्जरभाषायां व्याख्यानं च श्रीपद्मबोधिविजयशिष्यप्रवरेण मुनितीर्थबोधिविजयेन च विहितमस्ति, संस्करणस्य संशोधनं संमार्जनं च श्री हृदयसुंदरमुनिना श्रीयशरत्नमुनिना च कृतमस्ति। सेयं गुर्जरभाषाबद्धा व्याख्या मूलग्रन्थेन सह प्रतिपृष्ठं सपद्येव मुंबईतः प्रकाशिताऽस्ति किन्तु नेयं गुर्जरलिप्यां मुद्रिता, सेयं देवनागरीलिप्यां मुद्रिताऽस्ति, भाषा भवेत् प्रकामं गुजराती। न्यायशास्त्रशैलीबद्धायां प्रौढसंस्कृतगद्यरचनायामस्यां सविमर्शं विवेचितमस्ति यज्जिनराजस्य सर्वज्ञता कथं प्रमाणयितुं शक्यते। किं कश्चन सर्वज्ञो भवितुं शक्यते ? पूज्यपादस्य सर्वज्ञता कथं प्रमाण्येत इत्येवास्मिन् ग्रन्थे प्रतिपादितमस्ति।

सूरिपुरन्दरस्य हरिभद्रसूरीश्वरस्य ग्रन्थोऽयं मुनिवरतीर्थबोधिविजयेन गुर्जरभाषायां विशदतया व्याख्यातो दुर्लभस्याल्पपरिज्ञातस्य च ग्रन्थस्यैकस्य नूतनावतरणरूपेण स्वागतवाग्भिः परिशीलितोऽस्ति, मुम्बईतः प्रकाशितस्यास्य ग्रन्थस्यायं विशेषः।

**श्रीसर्वज्ञसिद्धिप्रकरणः ले. आचार्य हरिभद्रसूरीश्वरः, व्याख्याकारः मुनितीर्थबोधिविजयः प्रकाशक त्रिभुवनभानुशासनसेवाट्रस्ट, ए/403 ईस्टर्न कोर्ट, तेजपाल रोड, विलेपार्ले ( ईस्ट ) मुंबई पृ.सं. 60, मूल्यं नाऽङ्कितम्।**

---

**प्रश्नोत्तरप्रवाहिनी व्याकरणशास्त्रीया**

# संस्कृतश्लोकमन्दाकिनी

❑ डॉ. प्रमोदकुमारशर्मा

**सजिष्यन्ति च लोके के सज्जतिकः ससज्जकः।**
**शीघ्रं वदन्तु विद्वांसः कुशलाः शास्त्रपारगाः।। 1।।**

**जलं विना यथा मत्स्यःगीष्मर्तौ व्याकुलस्तथा।**
**आतपे मूर्छिता सर्वा प्रकृतिर्नैव सज्जति।। 2।।**

**नवैः पर्णैस्तथा पुष्पैः नायिकेव मनोहरा।**
**वसन्ते चागते सर्वा सज्जतिः प्रकृतिः स्वयम्।। 3।।**

**परिश्रमं विना गन्तुं परीक्षां पार्श्ववर्तिनीम्।**
**चिटनोटादिदिव्यास्त्रैः परीक्षार्थी न सज्जति।। 4।।**

**विवाहावसरे सर्वे परमोत्साहपूरिताः।**
**सज्जन्ति पुरुषाः लोके वरयात्राप्रसंगतः।। 5।।**

**शृंगारैः विविधैः पूर्णः वस्त्रालङ्कारचन्दनैः।**
**स्त्रियः सज्जन्ति लोकेऽस्मिन् करवाचौथपर्वणि।।6।।**

**रावणस्य विनाशाय युद्धाय कृतनिश्चयः।**
**ससज्ज भगवान् रामः दिव्यशस्त्रसमन्वितः।। 7।।**

**राक्षसानां विनाशाय सीताया रक्षणाय च।**
**रामस्य वानरी सेना ससज्ज प्रलयोन्मुखा।।8।।**

**धीराः सज्जन्तु देशस्य रक्षायै दृढनिश्चयाः।**
**अत्याधुनिकशस्त्रैश्च संयुक्ताः वीरसैनिकाः।। 9।।**

**सजिष्यन्ति स्त्रियः सर्वाः सजिष्यन्ति नरास्तथा।**
**सजिष्यन्ति च गेहानि नववर्षस्समागतः।। 10।।**

**सन्दर्भः - 'षस्ज गतौ' धातुः, भ्वादिः सेट्, सकर्मकः**

**प्राचीनव्याकरणविभागे सहाचार्यः,**
**सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी**

आयुर्वेद-स्तम्भः

# वसन्ते कफघ्ना: योगा:

❑ प्रो. बनवारीलालगौड:
पूर्व-कुलपति:

**मधुश्च माधवश्च वासन्तिकौ मासौ तथा तपस्तपस्यौ शैशिराविति स्वीकुर्वन्ति विद्वांसः। यद्यपि भारतीयज्योतिषगणनानुसारन्तु वसन्तस्यागमनं माघमासस्य शुक्लपक्षस्य पञ्चम्यां तिथावेव भवति तथापि तत्तु सांकेतिकमेव। कदाचिदेषा वसन्तपञ्चमी फरवरीमासस्य प्रारम्भिकेषु दिवसेषु समागच्छति कदाचितूत्तरेषु दिवसेषु समापतति। ततः पूर्वन्तु कदाचित्तपसि शिशिरप्रभावाच्छीतीभूतस्योत्तरे भारते हिमाच्छादिते क्षेत्रे पूर्वन्तु शीतलैस्तुहिनैः सह संसक्तः पुनश्च सहसा वियुक्तो विमनाः विरूक्षोऽतिशीतो मातरिश्वा स्वमातृस्थानं सन्त्यज्य यदा विमुक्ते विस्तृते क्षेत्रे समायाति तदा तस्य प्रालेयात्मकं संस्पर्शमवाप्य प्रभाकरः प्रभाविहीनः स्वोष्माणं परित्यज्य भ्रमित इव भ्रमति। जनास्तु शीतलस्य समीरस्य संस्पर्शमनुस्मृत्यैव प्रकम्पनमनुभवन्ति। यदा च साक्षाद्रूपेणोत्तरतः प्रवहमाणस्य नभस्वतः प्रबलं स्पर्शमनुभवन्ति तदा तु यानं शयनमासनञ्च संवृतस्वरूपेण सेवमाना अपि जनाः चलदलतरुदलमिव निरन्तरं ग्लेपन्ते।**

चैत्र एवं वैशाख ये वसन्त के महीने हैं तथा माघ एवं फाल्गुन ये शिशिर ऋतु के महीने हैं, ऐसा विद्वान् लोग स्वीकार करते हैं। यद्यपि भारतीय ज्योतिष की गणना के अनुसार तो वसन्त का आगमन माघ मास की शुक्ल पक्ष की पञ्चमी तिथि को ही हो जाता है फिर भी वह तो सांकेतिक ही है। कभी-कभी यह वसन्त पंचमी फरवरी के प्रारम्भिक दिनों में आती है तथा कभी-कभी अंतिम दिनों में आती है। इसके पहले तो कभी फाल्गुन में शिशिर के प्रभाव से शीत स्वरूप हुए उत्तर भारत में हिमाच्छादित क्षेत्र में पहले तो शीतल बर्फ के कणों से चिपका हुआ और पुनः सहसा उनसे अलग हुआ अनमना विशेषरूप से रूक्ष लेकिन अत्यंत शीत मातरिश्वा (वायु) अपने मातृस्थान को (उस हिमालय क्षेत्र को) छोड़कर जब खुले विस्तृत मैदानी क्षेत्र में आता है तब उस बर्फीले स्पर्श को प्राप्त करके प्रभाकर (सूर्य) प्रभा से विहीन होकर अपनी ऊष्मा को छोड़कर भ्रमित की तरह घूमता है। लोग तो शीतल वायु के स्पर्श को स्मरण करके ही प्रकम्पन का अनुभव करते हैं तो उसका तो यान, शयन और आसन को भी ढके हुये रूप में सेवन करते हुये भी लोग पीपल के पत्ते की तरह निरन्तर काँपते हैं (अर्थात् और भी अधिक प्रकम्पित होते हैं)।

**एषः शीतप्रवाहस्तु पञ्चदिनान्यथवा दशदिनानि यावदेव भवति, ततः परावर्तिते तु शीतले प्रकम्पनात्मके स्वकम्पने भीत इवाऽपावृतस्तु सहस्रांशुः अनावृतो भूत्वा पुनस्तीव्रतामापादयति तथा शनैः शनैः स्वान् किरणान् विस्फारयति। अतः लाक्षणिकरूपेण यदा वसन्तागमनम्भवति तदैव वसन्तस्य स्वरूपमामनन्ति विद्वांसः, वस्तुतः तद्रूपन्तु मधुमास एव प्रस्फुटीभवति। अत एवास्य प्रारम्भस्तु सामान्यतया फरवरीमासस्यान्तिमेषु दिवसेष्वथवा मार्चमासस्य प्रारम्भिकेषु दिवसेषु जायते। अत एव सामान्यतया फरवरीमासस्य 25 दिनाङ्कतः अप्रेल-मासस्य 24 दिनाङ्कपर्यन्तः कालो भवति वसन्तस्येति मध्यमः मार्गः। तदनुरूपमेव वसन्तर्तुचर्यायाः परिपालनङ्करणीयम्।**

यह शीतल प्रवाह तो 5 दिन तक अथवा 10 दिन तक ही होता है उसके बाद कम्पन करने वाले शीतल वायु के लौट जाने पर तो डरे हुये की तरह ढका हुआ (छिपा हुआ, अपावृत:) वह सूर्य अनावृत (आवरणरहित) हो कर पुन: तीव्रता प्राप्त करता है तथा धीरे-धीरे अपनी किरणों को फैलाता है। इसलिए लाक्षणिक रूप से जब वसन्त का आगमन होता है तब ही बसन्त के स्वरूप को विद्वान् लोग मानते हैं। वस्तुत: उसका रूप चैत्र मास से ही प्रस्फुटित होता है, इसलिए इसका प्रारम्भ तो सामान्यतया फरवरीमाह के अन्तिम दिनों में अथवा मार्च मास के प्रारम्भिक दिनों में होता है। इसलिए सामान्यतया फरवरी महीने के 25 दिनाङ्क से अप्रैल माह के 24 दिनाङ्क तक वसन्त का काल होता है, यह मध्यम मार्ग है। इसके अनुरूप ही वसन्त की ऋतुचर्या का परिपालन करना चाहिए।

**पतत्रिगणा अपि लक्षणानि दृष्ट्वैव केलिङ्-कुर्वन्ति। यदा वसन्तस्यागमनम्भवति तदा हि नवप्रवालत्वक्पत्राः पादपाः नवयौवनसम्पन्ना इव भान्ति तथा किंशुकाशोक-सहकारादिभिः या वनराजयस्ताभिः विराजिताः निर्मलाः ककुभश्च कोकिलालिकुलालापकलकोलाहलाकुला भवन्ति। सामान्यतया वसन्तस्य प्रथमे मासे मधौ दक्षिणो वायुर्वात्याताम्रकिरणो रविश्च किञ्चित्ती-व्रतामापादयति। हेमन्ते निचितः श्लेष्मा वसन्ते ताभिः विस्फारिताभिः दिनकृद्भाभिरीरितः कायाग्निं बाधते ततः बहून् रोगान् प्रकुरुते।**

पक्षियों के समूह भी वसन्त के लक्षणों को देखकर ही अपनी क्रीड़ा करते हैं। जब वसन्त का आगमन होता है निश्चय ही तब नवीन कोंपल एवं त्वचाएं लाल पत्तों वाले वृक्ष नवयौवन से संपन्न होते हुए की तरह सुशोभित होते हैं तथा किंशुक, अशोक एवं आम इत्यादि से जो वन की पंक्तियां हैं उन से सुशोभित स्वच्छ दिशाएं कोयल और भंवरों के समूहों के गुंजन से मधुर कोलाहल से व्याप्त हो जाती हैं। सामान्यत: वसन्त के प्रथम महीने चैत्र में दक्षिण दिशा वाली वायु बहती है तथा लोहित किरणों वाला रवि कुछ तीव्रता को प्राप्त करता है। हेमन्त में संचित हुआ श्लेष्मा वसन्त में उन विस्फारित की हुई सूर्य की किरणों से प्रेरित हुआ जठराग्नि को बाधित करता है, उसके बाद (उस कारण से) अनेक प्रकार के रोगों को वह श्लेष्मा करता है।

**अतोऽस्मिंस्तीक्ष्णवमनधूमगण्डूषनावनङ्करणी-यम्, व्यायामोद्वर्तनक्षौद्रयवगोधूमांश्च सेवेत, क्षौद्रवारि चानुपिबेत्। गुरुशीतदिवास्वप्नस्निग्धाम्ल-मधुरांस्त्यजेत्। ऋतावस्मिन् प्रायशो दधि गर्हितं भवति। कफघ्नानाञ्च योगानां सेवनं समुचितम्। अत्र केषाञ्चिद्योगानामुल्लेखः क्रियते-**

अत: इसमें (वसन्त ऋतु में) तीक्ष्ण, वमन, धूम, गण्डूष, नावन (नस्य) चिकित्सक के परामर्श से करने चाहिए। इसके अतिरिक्त व्यायाम, उबटन करना चाहिए तथा शहद, जौ, गेहूं का सेवन करना चाहिए तथा इनके बाद में शहद मिला हुआ पानी (मधूदक) पीना चाहिए। गुरु, शीत पदार्थों को परिवर्जित करना चाहिए तथा दिन में सोना एवं स्नेह अम्ल तथा मधुर पदार्थों का त्याग करना चाहिए। इस ऋतु में प्राय: दधि गर्हित (निन्दित) होता है और इस ऋतु में कफघ्न योगों का सेवन करना उचित रहता है। यहाँ कुछ योगों का उल्लेख किया जा रहा है-

**1. हरिद्रां चित्रकं, निम्बमुशीरातिविषे, वचाम्, कुष्ठमिन्द्रयवान्, मूर्वां पटोलपत्रञ्च सममात्रायां**

गृहीत्वा एभिः विनिर्मितं क्वाथं पिबेत्। एषः वासन्तिकं ज्वरं नाशयति।

हल्दी, चित्रक, नीम, उशीर ( खस ), अतिविषा ( अतीस ), वचा, कूठ, इंद्रजौ, मूर्वा ( मधुरसा, पीलुपर्णी, कुछ लोग मूर्वा से मरोड फली लेते हैं लेकिन द्रव्यगुण के विशेषज्ञों को यह स्वीकार्य नहीं है ) एवं परवल के पत्ते इनसे बनाया गया क्वाथ पीना चाहिए। यह वसन्त ऋतु में होने वाले ज्वर को नष्ट करने वाला होता है।

2. मुस्तं , वृक्षकबीजानि, त्रिफलां, कटुरोहिणीं तथा परूषकञ्च समानमात्रायां गृहीत्वा एभिः विनिर्मितं क्वाथं पिबेत्। एषः क्वाथः कफज्वरविनाशनोऽस्ति।

नागरमोथा, इंद्रजौ, त्रिफला, कुटकी एवं फालसा इनसे बनाया गया क्वाथ पीना चाहिये। यह क्वाथ कफज्वर को नष्ट करता है।

3. नागरं धान्यकं वचां पर्पटकं मुस्तं भूतीकमथ कट्फलञ्च समानमात्रायां गृहीत्वा निष्क्वाथ्य कफवातोत्थे क्षौद्रहिङ्गुसमन्वितमिमं कषायं पातव्यम्। एषः श्वासं कासं नाशयति। श्लेष्मोत्सेके गलग्रहे च सुखावहः। हिक्कासु परमोपयोगी ह्येषः कण्ठश्वयथौ, हृदयपार्श्वजे च शूले हितावहो वर्तते।

सोंठ, धनिया, वचा, पित्तपापड़ा, नागरमोथा, भूतृण ( गंधतृण, हरी चाय ) एवं कायफल इन सब को समान मात्रा में ले कर इन का क्वाथ बनाकर उसमें ( 10 ग्राम ) शहद एवं ( 1 ग्राम ) हींग मिलाकर पिलाना चाहिए। यह श्वास एवं कास को नष्ट करता है तथा बार-बार कफ के आने में गले की जकडाहट ( या गला बैठना ) में सुखकारी होता है। हिक्का में हितकारी यह कंठ में सूजन हो उस में एवं हृदय के पार्श्वभाग में होने वाले शूल में हितकारी है।

4. रास्नावृषोऽथत्रिफलाराजवृक्षफलैः सह साधितः पीतश्च कषायः वातपित्तज्वरं जयेत्।

रास्ना, आडूसा, त्रिफला, एवं अमलतास के गूदे के साथ बनाया गया एवं पीया गया काढा वातपित्त से सम्बंधित ज्वर को दूर करता है।

5. गुडूचीनिम्बधात्रीणां कषायं समाक्षिकम्पिबेत्, अत्र आर्द्राममृतां पञ्चदशग्रामपरिमितां तथा निम्बत्वगामलकञ्च पृथक् पृथक् रूपेण पञ्चग्रामपरिमितौ गृहीत्वा क्वाथविधिना क्वाथो विधेयः।

गिलोय, नीम की छाल एवं आंवला इनका क्वाथ बनाकर शहद मिलाकर पीना चाहिए। यहाँ पर ताजा गिलोय 15 ग्राम तथा नीम की छाल एवं आंवला अलग-अलग रूप से 5-5 ग्राम की मात्रा में लेकर क्वाथ की विधि से क्वाथ बनाना चाहिए। स्वस्थ व्यक्ति के द्वारा भी पिया गया यह क्वाथ वसन्त में होने वाले ज्वर को अपवारित करता है अर्थात् होने नहीं देता और ( यदि किसी को ज्वर हो भी गया तो उस ) ज्वरित व्यक्ति के ज्वर का निवारण करता है।

एतेषु सर्वेषु क्वाथेषु निर्माणानन्तरं शीतीभूतेषु मधुसम्मिश्र्य पिबेत्।

इन उपर्युक्त सभी प्रकार के क्वाथों में निर्माण के बाद ठंडा होने पर शहद मिलाकर पीना चाहिए।

80, सेनापति हाउस के पीछे
प्रेमनगरम्, झोटवाड़ा, जयपुरम्

नारी-स्तम्भः

# परधर्मो भयावह

❑ डॉ. राजेश्वरी भट्टः

कोरोनासंक्रमणं विश्वस्मिन् विश्वे महामारी-रूपेण त्वरितगत्या प्रसृतं दृश्यते। चीन-जापान-ईरान-इटली-अमरीकादिभिः सहैव अन्येऽपि देशाश्च कोरोनासंक्रमणेन आक्रान्ता भयभीताश्च दृश्यन्ते। सम्प्रति प्राणघातकमिदं संक्रमणं भारतदेशेऽपि प्रविष्टमभवत्। भयेनानेन जनजीवन-व्यापार-शिक्षा-चिकित्सा-उद्योग-यातायात-मनोरञ्जनादिषु क्षेत्रेषु सर्वत्र गतिरोधोऽजायत। अनेन निखिले विश्वे अकल्पनीया हानिर्जाता। प्रातः दूरदर्शनमाध्यमेन, समाचारपत्रैश्च कोरोनासंक्रान्ता-नामगणितानां निरीह जनानामकालमृत्योः समाचाराः हृदये कम्पं जनयन्ति। बालकेषु कोरोनासंक्रमण-भयेन विद्यालयेषु महाविद्यालेयषु च बालकानां कृते अवकाशो घोषितः। नगरेषु कार्यालयेषु समारोहेषु च पूर्वनिर्धारिताः कार्यक्रमाः स्थगिताः जाताः येन आयोजनानामपूरणीया क्षतिरभवत्। यात्रिभिः पूर्व निर्धारिताः कार्यक्रमा अपि स्थगिताः कृताः। नगरेषु चित्रपटदर्शनस्य प्रसारोऽपि निषेधितः। फलतः राष्ट्रे अकल्पनीया धनहानिरजायत। भीषणादस्मात् संक्रमणाद् मानवान् रक्षयितुं, चिकित्साविभागाद् केचिदुपाया निर्दिष्टा येषां समाचरणं रोगस्य प्रतिरोधने लाभकरं भविष्यति। सर्वप्रथममस्माभि-रागन्तुकैः सह झटिति हस्तमेलनं न करणीयमपितु दूरादेव अभिवन्दनं स्वीकरणीयम्। एतदतिरिक्तं बहिर्भ्रमणादनन्तरं गृहे प्रविशद्भिः जनैः द्वारि एव हस्तौ पादौ च प्रक्षाल्य ततो गृहे प्रवेष्टव्यम्। उच्छिष्टात्पर्युषिताद् भोजनाद् आत्मानं रक्षतु। नित्यं तुलसीदलस्य सेवनम् करणीयम्। इमे रोगनिरोधका उपायाः संक्रमणाद् मानवान् रक्षितुं सहायकाः भविष्यन्ति। अहं मन्ये यत् कोरोनासंक्रमणादात्मानं रक्षितुं येप्युपायाः स्वास्थ्यविभागात् प्रसारिता ते सर्वे अस्माकं संस्कृतेराचारसंहितायामनिवार्यरूपेण पालनीया नियमाः सन्ति। जानन्त्येव भवन्तो यद् भवतु कोप्यवसरः किमपि कार्यं पूर्वं हस्तौ प्रक्षाल्य एव वयं गतिविधिषु प्रवृत्ता भवामः। अस्माकं पूजाविधिषु पुरोहितो वारं वारं यजमानं हस्तप्रक्षालनार्थमादिशति। को न जानाति यत् पूर्वं यदा कोऽपि गृहसदस्यो अतिथिर्वा गृहं प्राविशत् तदा गृहं स्थिता माता, पत्नी, कन्या कोऽपि गृहसदस्यो वा जलमानीय हस्तौ पादौ च प्रक्षालनस्य कृते तमब्रवीत्। गृहेषु जनैः तुलसीयुक्तं जलं तु नित्यमाचमनीमवर्तत। देशस्य दुर्भाग्यं वर्तते यत् पाश्चात्यसंस्कृतेः प्रभावेण अन्धानुकरणेन च आचारसंहितायां निर्दिष्टानि धर्मग्रन्थेषु समर्थितानि, युगयुगेभ्यो भारतदेशवासिभिः अक्षरशः समाचरितानि संरक्षितानि अमृतमयानि सञ्जीवकानि सूत्राणि अस्माभिः उपेक्षितानि। अद्य तु कोऽपि कुतोऽपि किमपि कृत्वा गृहं प्रविशति वयं विद्युद्गत्या

**हस्तमेलापनेन सह तस्य स्वागतं कुर्मः। एवमेव दूषिता दूषितेन वा केनाऽपि मार्गेण पुनरागता वयं सपादत्राणं गृहं प्रविशामः। किमधिकं गृहे निर्मितममृततुल्यं सद्यः पक्वभोजनं तिरस्कृत्य उपेक्ष्य वा हानिकरैर्द्रव्यैर्मिश्रितं चिरेण पात्रेषु पिहितं, पर्युषितमुच्छिष्टं च भोजनमस्मभ्यं रोचते। तुलसीदलस्य नित्यसेवनम् तु दूरे तिष्ठतु अस्य अनिवार्यतामनुभूय तुलसीदलानां प्राप्त्यर्थं वयम् इतस्ततो धावामः। इदमाचरणमस्माकं कृते निन्दनीयं वर्तते। युगयुगेभ्यो मानवानां कृते कल्याणकरी परम्परा अस्माभिः प्रयत्नेन पुनः प्रतिष्ठापनीया। बालकानां मनसि शैशवादेव मातुर्वचनानि रुचिकराणि भवन्ति। अतः समये समये मातृभिः शिशूनां कृते सद्ग्रन्थेषु वर्णितानां सत्पुरूषाणां चरित्राणि श्रावितव्यानि, सदाचरणस्य महत्त्वं वर्णितव्यम्। नूनं परिजनानां प्रयत्नेन कल्याण-करी अस्माकं परम्परेयं सुरक्षिता भविष्यति। कथितञ्च-'स्वधर्मे निधनंश्रेयः परधर्मो भयावहः।'**

## हिन्दी अनुवाद

'कोरोनासंक्रमण' सम्पूर्णविश्व में महामारी के रूप में फैल रहा है। चीन, जापान, ईरान, इटली, अमेरिका साथ ही अन्य देश भी कोरोना के संक्रमण से आक्रान्त एवं भयभीत हैं। यह प्राणघातक संक्रमण अब भारतदेश में भी प्रविष्ट हो गया है। इसके भय से जनजीवन, व्यापार, शिक्षा, चिकित्सा, उद्योग, यातायात, मनोरंजन, आदि क्षेत्रों में सर्वत्र गतिरोध उत्पन्न हो गया है। जिससे सम्पूर्णविश्व में अकल्पनीया हानि हो रही है। प्रातः काल दूरदर्शन एवं समाचार पत्रों के माध्यम से कोरोना संक्रमण से संक्रमित अगणित निरीह लोगों की अकाल मृत्यु के समाचारों से दिल दहल जाता है। बालकों में कहीं कोरोना का संक्रमण न फल जाए इस भय से विद्यालयों एवं महाविद्यालयों में अवकाश घोषित कर दिया गया है। नगरों एवं कार्यालयों में पूर्व निर्धारित कार्यक्रम स्थगित कर दिये गए हैं। सिनेमाघरों में भी ताले लग गए हैं जिससे राष्ट्र में बहुत अधिक धनहानि हो रही है। कोरोना संक्रमण जैसे भीषण रोग से मानवों की रक्षा करने के लिए चिकित्सा विभाग ने कुछ निर्देश दिये हैं जिनके पालन से रोग प्रतिराधक शक्ति में वृद्धि होगी। सर्वप्रथम हमें आगन्तुकों के साथ सहसा हाथ नहीं मिलाना चाहिए, अपितु दूर से ही उनका अभिनंदन स्वीकार करना चाहिए। इसके अतिरिक्त बाहर घूमकर घर में प्रवेश करने वाले व्यक्तियों को हाथ पैर धोकर ही घर में प्रवेश करना चाहिए। नित्य तुलसी के पत्तों का सेवन करना चाहिए। ये सभी उपाय कोरोना संक्रमण से मानवों की रक्षा करने में लाभप्रद हैं। मैं तो यह मानती हूँ कि कोरोनासंक्रमण से अपने को बचाने के जो उपाय स्वास्थ विभाग से प्रसारित किये गये हैं वे सभी भारतीय संस्कृति की आचारसंहिता में मानव मात्र के लिए समाचरणीय अनिवार्य नियम हैं। आप को ज्ञात है कि हमारे यहाँ किसी भी अवसर पर कार्य के पूर्व हाथ धोकर ही हम गतिविधियों में प्रवृत्त होते हैं। हमारी पूजाविधि से पुरोहित बार बार यजमान को हाथ धोने का आदेश देता है। कौन नहीं जानता कि पहले जब कोई गृहसदस्य अथवा अतिथि घर में प्रवेश करता

था तब घर में स्थित माता, पत्नी, बहिन, अथवा अन्य कोई भी सदस्य जल लाकर उसे हाथ पैर धोने के लिए कहता था। तुलसी मिश्रित जल का आचमन तो हर घर में पूजा विधि का अङ्ग ही था। देश का दुर्भाग्य है कि पाश्चात्य संस्कृति के दुष्प्रभाव एवं अन्धानुकरण से आचार संहिता में निर्दिष्ट, धर्मग्रन्थों में वर्णित, युगयुगों से भारत वासियों द्वारा समाचरित एवं संरक्षित अमृतमय एवं सञ्जीवक सूत्र हमारे द्वारा उपेक्षित हो गए हैं। आज तो कोई भी, कहीं से कुछ भी करके घर में प्रवेश करता है तो हम विद्युत् गति से हाथ मिलाकर उसका स्वागत करते हैं। इसी तरह दूषित अथवा अदूषित किसी भी मार्ग से चलकर आए हुए व्यक्ति बिना जूते उतारे ही घर में प्रवेश करते हैं। अधिक क्या कहें? घर में निर्मित अमृत तुल्य हाल ही में पकाये हुए भोजन को छोड़कर हानिकर द्रव्यों से मिश्रित डिब्बों में बन्द बासी भोजन करना हमें रुचिकर लगता है। तुलसीदल का सेवन तो छोड़ो विशिष्ट अवसरों पर तुलसीदल की आवश्यकता होने पर उसकी प्राप्ति के लिए हम इधर उधर दौड़ते रहते हैं। यह आचरण क्या हमारे लिए निन्दनीय नहीं है। युगयुगों से मानव कल्याणकरी परम्परा की पुन: प्रतिष्ठा के लिए हमें प्रयत्न करना चाहिए। बालकों के मन को माता के वचन सबसे अधिक रुचिकर लगते हैं। अत: माताओं को समय समय पर सद्ग्रन्थों में वर्णित सत्पुरुषों के जीवन चरित्र सुनाने चाहियें, सदाचरण का महत्त्व समझाना चाहिए। निश्चय ही परिजनों के प्रयत्न से हमारी कल्याणकरी परम्परा सुरक्षित रहेगी। कहा भी गया है-

अपने धर्म में मरना भी कल्याणकारी है, दूसरे का धर्म भयावह है।

**-सी-276, भाभा मार्ग, तिलकनगर, जयपुर**

**संस्कृतसमाचार:**

# ज्योतिष-वास्तु-प्रशिक्षणशिविरार्थिसम्मानसमारोहस्यायोजनम्

विश्वगुरुदीप-आश्रमशोधसंस्थानं राजस्थान संस्कृत-अकादमीजयपुरम् इत्यनयो: संयुक्त-तत्त्वावधाने जनवरी-मासे द्वाविंशतितमाद् दिनांकादारभ्य फरवरीमासस्य द्वादशदिनांकं यावत् संचालितस्य ज्योतिष-वास्तु-प्रशिक्षणशिविरस्य शिविरार्थिनां सम्मानसमारोह: शोधसंस्थानस्य प्रांगणे फरवरीमासस्य षोडशदिनांके समायोजित: अभवत्।

समारोहे महामण्डलेश्वरा: स्वामिज्ञानेश्वरपुरीमहोदया: अध्यक्षा: आसन्, श्रीमती शशिप्रभास्वामी मुख्यातिथि:, डॉ. विनोदकुमारशर्मा (ज.रा.रा.सं.वि.वि. जयपुरम्) विशिष्टातिथिश्चास्ताम्।

समारोहस्य संचालनं डॉ. सुरेन्द्रकुमारशर्मणा विहितम्। समारोहे एकविंशतिसंख्याकेभ्य: शिविरार्थिभ्य: ससम्मानं प्रशिक्षणप्रमाणपत्राणि वितीर्णानि। शिविर-प्रशिक्षका: डॉ. रामदेवसाहूमहोदया:, डॉ. योगेशकुमार: (शोधसंस्थाननिदेशका:), पं. अनन्तशर्माण:, डॉ. दयारामस्वामिन:, आचार्यराजेन्द्रमहोदया अन्येऽप्यनेके विद्वांस: समुपस्थिता आसन्। समारोहस्य सम्पन्नतायां संस्थाननिदेशक: डॉ. योगेशकुमार: शर्मा आगन्तुकानां शिविरार्थिनां च धन्यवादं ज्ञापितवान्।

**- डॉ. सुरेन्द्रकुमारशर्मा**

संस्कृतसमाचारः

# संस्कृतभारत्याः गोष्ठी सम्पन्ना

संस्कृतभारत्याः समीक्षायोजनागोष्ठी फरवरीमासस्य 8,9, दिनांकयोः कालटीनगरे (केरले) आद्यशंकराचार्यस्य जन्मभूमौ शृंगेरीशंकराचार्यस्य मठे सम्पन्ना। 8 दिनाङ्के 2019-20 वर्षस्य कार्यक्रमाणां समीक्षा कृता। 9 दिनाङ्के 20-21 वर्षस्य कार्यक्रमाणां योजना कृता। गोष्ठ्यां कार्यकर्तॄणाम् आह्वानं कृतं यत् अन्ताराष्ट्रियकार्यालयस्य निर्माणाय सर्वैः सहयोगः करणीयः अथ च अधिकाधिकं संस्थाः, संघटनानि, जनाश्च संस्कृतपठनकार्ये, संस्कृत-प्रचारकार्ये च सहभागं कुर्युः इति प्रयासः करणीयः। मई मासे बैंगलूरुनगरे प्रगतप्रशिक्षणवर्गस्य आयोजनं भवष्यिति। इतः पूर्वं प्रान्तस्तरे प्रबोधनवर्गाणां क्षेत्रस्तरे च प्रशिक्षणवर्गाणाम् आयोजनमपि भविष्यति। अगस्तमासस्य प्रथमसप्ताहे संस्कृतसप्ताहस्य आयोजनं सम्पूर्णदेशे करणीयम् इत्यपि गोष्ठ्यां निर्णीतम्। नवम्बरमासे अखिलभारतीयम् उपवेशनं भविष्यति। ततः परं जनपदसम्मेलनानाम् आयोजनं करणीयम्। आगामिनि वर्षे सर्वेषु प्रान्तेषु अपि शलाकापरीक्षा आयोजनीया। अखिलभारतीयशलाकापरीक्षा फरवरीमासे काश्यां भविष्यति।

गोष्ठीम् अखिलभारतीयमहामंत्री श्रीशदेवपुजारी महोदयः स्वीकृतवान्। सः सूचितवान् यत् सम्पूर्णदेशे 1010 साप्ताहिक संस्कृतकक्ष्याः चलन्ति।

अखिलभारतीयसंघटनमंत्री श्रीदिनेशकामतः पाथेयभाषणं कृतवान्। गोष्ठ्यां राजस्थानतः षट् कार्यकर्तारः भागं गृहीतवन्तः।

– तगसिंहराजपुरोहितः

# माघमहोत्सव आयोजितः

फरवरीमासे 9 तः 16 दिनांकं यावत् माघजयन्ती-मुपलक्ष्य राजस्थानसंस्कृतअकादमीद्वारा महाकविमाघ-महोत्सवस्य आयोजनं कृतम्। नवमदिनाङ्के भीनमालनगरे सांस्कृतिकसंध्या आयोजिता। भीनमालनगरं माघस्य जन्मभूमिः इति मन्यते। जयपुरे श्रीमहावीरदिगम्बरजैन-विद्यालयस्य प्रेक्षागृहे दशमदिनाङ्के **ध्रुवासंस्कृतवाद्य**-वृन्दद्वारा वैदिकमंत्राणां गणेशवन्दनायाः विविधस्तोत्राणां च प्रस्तुतिः प्रदत्ता। ज्ञातव्यमस्ति यत् ध्रुवासंस्कृततूर्यवादि-त्रगणः विश्वस्य प्रथमसंस्कृतवाद्यवृन्दम् (बैण्ड) अस्ति। राष्ट्रियसंस्कृतसंस्थानस्य संयुक्ततत्त्वावधाने संस्थान-परिसरे 'माघमहाकाव्ये लोकजीवनं राजनीतिः लोकप्रशासनं च' विषयिकी राष्ट्रिया संगोष्ठी अपि आयोजिता। संस्थानपरिसरे एव एकादशदिनाङ्के ध्वनितत्त्वम् अवलम्ब्य 'पण्डितपरिषद्', आयोजिता। अशोकराहीद्वारा लिखितस्य शिशुपालवधनाट्यस्य मंचनं त्रयोदशदिनाङ्के जोधपुरे षोडशदिनाङ्के जयपुरे च कृतम्। पंचदशदिनाङ्के जयपुरस्थे रवीन्द्रमंचे रामायणमहा-भारताधारितम् अखिलभारतीयं कविसम्मेलनम् आयोजितम्। जयपुरे एव षोडशदिनाङ्के 'संस्कृतकविः राजनीतिश्च' इति विषयमवलम्ब्य वार्तायाः (टॉकशो) अपि आयोजनं कृतम्।

कार्यक्रमेषु राजस्थानसर्वकारस्य मंत्रिणः राजनेतारः, अधिकारिणः, विविधसंस्थाप्रमुखाः, न्यायाधिपतयः, कुलपतयः, विद्वांसश्च अतिथिरूपेण अथ च शिक्षकाः, छात्राः, सामान्यजनाश्च दर्शकरूपेण आगतवन्तः। राजस्थानसंस्कृतअकादभ्याः सर्वोच्चपुरस्कारः माघ-पुरस्कार एव अस्ति। अस्मिन् वर्षे विविधसंस्थानां साहाय्यं प्राप्य माघजयन्त्याः बृहदायोजनम् अकादमीद्वारा कृतम् इति तु संस्कृतानुरागिणां कृते महतः संतोषस्य विषयः।

**-डॉ. नाथूलालसुमनः**

# सेवासमाचाराः

❑ डॉ. नाथूलालसुमनः

कोरोनासङ्क्रमणकाले समग्रेऽपि भारतराष्ट्रे राष्ट्रीयस्वयं सेवकसंघस्य कार्यकर्तृभिः संघयोजनाद्वारा- संचालितसंस्थाभिश्च वस्तुवितरणं विविधानि सेवाकार्याणि च कृतानि क्रियमाणानि च सन्ति। अप्रेलमासस्य18 दिनाङ्कपर्यन्तं कृतानां सेवाकार्याणां विवरणम् अत्र प्रस्तूयते-

1. सेवास्थानानि - 45131
2. सेवारतकार्यकर्तारः - 252101
3. सेवितकुटुम्बानि (खाद्यसामग्री) - 2889699
4. पक्वं भोजनम् - 18650014 जनेभ्यः
5. मुखाच्छादकानि (मास्क) - 2497626
6. रक्तदानम् - 10758 जनाः
7. आयुर्वेदिकक्वाथः - 1387265 जनेभ्यः

एतदतिरिच्य स्थाने स्थाने गवां कृते तृणं वितरितं स्वास्थ्यकर्मिभ्यः व्यक्तिगतसुरक्षोपकरणानि (PPE Kit) हस्तप्रक्षालकं (कीटाणुनाशकौषधं-सेनेटाइजर) च प्रदत्तं, स्वच्छताकर्मिणाम् अभिनन्दनं कृतं सुरक्षाकर्मिभ्यश्च जलपानव्यवस्था अपि कृता।

राजस्थानक्षेत्रे जूनमासस्य 5 दिनाङ्कपर्यन्तं कृतानि सेवाकार्याणि-

1. सेवास्थानानि - 8337
2. सेवारतकार्यकर्तारः - 48060
3. सेवितकुटुम्बानि (खाद्यसामग्री) - 631428
4. पक्वं भोजनम् - 4784942 जनेभ्यः
5. मुखाच्छादकानि (मास्क) - 1180648
6. रक्तदानम् - 4898 जनाः
7. आयुर्वेदिकक्वाथः - 1089612 जनेभ्यः
8. अस्थायिनिवासः - 55202 जनेभ्यः
9. भ्रमणशील (घुमन्तू) जनसहायता - 30905

प्रवासिश्रमिक सहायता -

1. भोजनवितरणम्- 153 केन्द्रेषु 179969 श्रमिकेभ्यः कृतम्।
2. औषधवितरणम् - 21 केन्द्रेषु 5787 श्रमिकेभ्यः कृतम्।
3. यातायातसहायता - 24 केन्द्रेषु 4011 श्रमिकाणां कृता।

अस्मिन् कोरोनासङ्क्रमणकाले सेवाप्रसङ्गे बह्वयः प्रेरणास्पदाः घटनाः अपि घटिताः। महाराणाप्रतापस्य स्वाभिमानिनः सैनिकाः शकटगृहेषु निवसन्तः लोहकाराः भीलवाडानगरे सेवाभारतीद्वारा प्रदत्तस्य साहाय्यस्य न केवलं निषेधं कृतवन्तः अपितु स्वजनेभ्यः 51 सहस्रं रूप्यकाणि एकत्र कृत्वा निर्धनेभ्यः भोजनसामग्री-वितरणमपि स्वपक्षतः कृतवन्तः। अस्माकं प्रधानंम-त्रिणापि एतेषां प्रशंसा कृता। सेवाभारतीसंस्थायाः प्रेरणया बहुषु स्थानेषु महिलाभिः निःशुल्कं मुखाच्छादकनिर्माणं (मास्क इति) कृतम्।

# निवेदन

भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.– 09352030291 / 8947055999 पर सूचना लिखवा सकते हैं अथवा **SMS** भी कर सकते हैं।

नाम........................................ ........... ........ ........ ....................

पुत्र/पुत्री श्री........................................ भवन संख्या..............................

गली/ मोहल्ला/कॉलोनी..........................................................................

वाया/पोस्ट ऑफिस..............................................................................

तहसील.......................................... जिला.........................................

राज्य.......................................... देश...........................................

पिन..........................................दूरभाष..........................................

मोबाईल नं..........................................................................................

ईमेल....................................................................................................

निवेदक

**सुदामा शर्मा**, प्रबन्ध सम्पादक

**भारती संस्कृत मास पत्रिका**

बी–15, भारती भवन, न्यू कॉलोनी, जयपुर–302001 (राज.)

दूरभाष–2379014

ई–मेल – sanskritbharti09@gmail.com

# ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-

भारती पत्रिका का वार्षिक शुल्क रुपये 120/–,
पंचवर्षीय शुल्क 500/–,
आजीवन सदस्यता (15 वर्ष)
शुल्क 1500/– मात्र है।
आप केनरा बैंक की किसी भी शाखा में जाकर
हमारे निम्नलिखित खाते में राशि जमा करा सकते है –

**खाते का नाम – भारती**

**खाता संख्या – 2139101912502**

**IFS Code - CNRB0002139**

जमा रसीद की फोटो प्रति
ई–मेल **sanskritbharti09@gmail.com** से
या डाक द्वारा निम्न पते पर भिजवा देवें।

भारती संस्कृत मास पत्रिका
बी–15, भारती भवन, न्यू कॉलोनी, जयपुर–302001 (राज.)
दूरभाष–2379014

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20

हार्दिक शुभकामनाओं सहित :-

निर्माता

# ए इन्फ्रास्ट्रक्चर लिमिटेड

## एस्बेस्टोस सीमेन्ट पाइप्स

सस्ता, मजबूत एवं टिकाऊ

सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ

एवं

निर्माता

## एस्बेस्टोस सीमेन्ट शीट्स

छत एक, लाभ अनेक

उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें

कारखाना : हमीरगढ़ - 311025, जिला भीलवाड़ा (राजस्थान) दूरभाष: 01482-286102-07
दिल्ली कार्यालय : ए-9ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26961849/26965673
जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, जयपुर-302001 फोन: 0141-4019691/2370566
ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

## राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

(English) Weekly
ORGANISER

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



**You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org**

वार्षिक ग्राहक शुल्क

भारत में ₹ 700/- पाञ्चजन्य • ₹ 800/- ORGANISER (साधारण डाक द्वारा)

विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

**प्रसार विभाग**
**भारत प्रकाशन (दिल्ली) लिमिटेड**
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम्
अध्यक्ष: शंकरप्रसादशुक्लः प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा श्याम प्रिन्टर्स, किशनपोल बाजार, जयपुरम्
दूरभाष: 0141–4001974 पत्रसंकेत:– भारतीभवनम्, बी–15, न्यू कॉलोनी, जयपुरम्–302001
दूरभाष: 0141–2379014

प्रतिष्ठायाम्,